No. १५५०

Title कारिकावली व्याख्या न्याय सिद्धान्त मुक्तावली

Author म.म. पञ्चानन:

Extent 20 Age ×

Subject न्याय शास्त्रं

कारिकावली न्यायसिद्धान्तमुक्तावली सव्याख्यटीकासहिता

१५५०

२०५०

पत्रे २.

न्या० सि०
१

संसार महीरुह स्यबीजाय

श्रीरामायनमः चूडामणीकृतविधुर्वलयीकृतवासुकिः भवोभवतुभव्यायलीलातांडवपंडितः १ निजनिर्मितकारिकाव
लीमतिसंक्षिप्तचिरंतनोक्तिभिः विशदीकरवाणिकौतुकान्ननुराजीवदयावशंवदः २ सद्द्रव्यागुणगुंफितासुकृतिनांस
त्कर्मणां ज्ञापिकासत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्वला विष्णोर्वक्षसिविश्वनाथकृतिनासिद्धांतमुक्ता
वलीविन्यस्तामनसोमुदंवितनुतांसद्युक्तिरेषाचिरं ३ विघ्नविघातायकृतंमंगलंशिष्यशिक्षायैनिबध्नाति नूतनजल
धररुचयेगोपवधूटीदुकूलचौरायतस्मैकृष्णायनमः ननुमंगलेनविघ्नध्वंसप्रतिनवासमाप्तिंप्रतिकारणं। विनापिमंगलं
नास्तिकादीनांग्रंथेनिर्विघ्नपरिसमाप्तिदर्शनादितिचेन्न अविगीतशिष्टाचारविषयत्वेनमंगलस्यसफलत्वसिद्धौतत्र
फलजिज्ञासायांसंभवतिदृष्टफलकत्वेअदृष्टफलकल्पनायाअन्याय्यत्वादुपस्थितत्वात्समाप्तिरेवफलंकल्प्यते इत्थंचयत्रमं
गलंनदृश्यतेतत्रापिजन्मांतरीयंतत्कल्प्यते यत्रचसत्यपिमंगलेसमाप्तिर्नदृश्यते तत्रबलवत्तरोविघ्नो [illegible] प्राचु
र्यंवाबोध्यं प्रचुरस्यैवबलवत्तरविघ्ननिवारणेकारणत्वंबोध्यं विघ्नध्वंसस्तुमंगलस्यद्वारमित्याहुः [illegible] प्राचः नव्या
स्तु मंगलस्यविघ्नध्वंसएवफलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्॥ नचैवंस्वतःसिद्धविघ्नविरहवताकृतस्यमं
गलस्य [illegible] निष्फलत्वापत्तिरितिवाच्यं इष्टापत्तेः विघ्नशंकयातदाचरणात् तथैवशिष्टाचारात् नचतस्यनिष्फ
लत्वेतद्बोधकवेदाप्रामाण्यं सतिविघ्नेतन्नाशस्यैववेदबोधितत्वात् अतएवपापभ्रमेणकृतप्रायश्चित्तस्यनिष्फलत्वे

नूतनेति

त्व

विघ्न

वं

तद्बोधक १ च विशेषे संसारार्णवमहीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः ३

पि नैवेदाप्रामाण्यं मंगलं विघ्नध्वंसकारणं विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः कश्चिद्विघ्नासत्ताभावरूपस्य समाप्ति व
साधने प्रतिबंधकसंसर्गाभावस्य व कार्यजनकत्वात् इत्थं च नास्तिकादिग्रंथेषु जन्मान्तरीयमंगलजन्यदुरितध्वंसः स्व मध्व
तः सिद्धविघ्नासत्ताभावो वास्तीति न व्यभिचार इत्याहुः संसारमहीरुहस्य बीजाय एतेन ईश्वरे प्रमाणमपि दर्शितं भवति य
था हि घटादिकार्यं कर्तृजन्यं कार्यत्वात् तथा क्षित्यंकुरादिकमपि न च तत्र कर्तृत्वमस्मदादीनां संभवति अतस्तत्कर्तृत्वेन
ईश्वरसिद्धिः न च शरीराजन्यत्वेन कर्तृजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यं अप्रयोजकत्वात् मम तु कर्तृत्वेन कार्यत्वेन का
पंका रणाभावरणानुकूलस्तर्कः द्यावाभूमी जनयन्देव एकः विश्वस्य गोप्ता भुवनस्य कर्तेत्यादि आगमात् अप्यनुसंधेयाः द्रव्य द्रव्यादिनि...
गुणास्तथा कर्म सामान्यं सविशेषकं समवायस्तथाभावः पदार्थाः सप्त कीर्तिता इति सप्तमस्याभावत्वकथनादेव षण्णां भाव त्व
च त्वं प्राप्तं तेन भावत्वेन षड्गुपन्यासो न कृतः एते पदार्था वैशेषिकप्रसिद्धाः नैयायिकानामप्यविरुद्धाः प्रतिपादितं चैवमे
चिंता व भाष्ये अत एव उपमानं प्ररोक्तं सप्तपदार्थभिन्नतया शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशंकितं ननु कथमेतावत्पदा मव
र्थाः शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वात् तथाहि मण्यादिसंहितेन वह्निना दाहो न जन्यते तच्छून्येन तु जन्यते तत्र
मण्यादिना वन्हौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्यादिसहितेनैव घपसारेण न च जन्यत इति कल्प्यते एवं सादृ
श्यमप्यतिरिक्तः पदार्थस्तद्भिन्नषड्भावेष्वन्तर्भवति सामान्येपि सत्वात् यथा गोत्वं नित्यं तथाश्वत्वमपीति सादृश्यप्रतीतेः ना

आपो जलानि तेजो वह्निः मरुद्वायुः व्योम आकाशः कालः समयः दिक् ५ दाहादिकं प्रति मण्याद्यभावादेरेव हेतुत्वं कल्प्यते नैवेत्यर्थः मणिसमवधाने दाहापादाद्वारणे २

मा०प्रि०प० २ व्यभावे सत्येव प्रतीयमानत्वात् इति चेन्न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति मण्याद्यभावादेरेव वा स्वातंत्र्येण हेतुत्वं
कल्प्यते अनेनैव सामंजस्ये अनंतशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात् न चोत्तेजके सति प्रतिबंधकसद्भावे कथं दा पि
ह इति वाच्यं उत्तेजकाभावविशिष्टमण्यभावस्य हेतुत्वात् सादृश्यमपि न पदार्थांतरं किंतु तद्भिन्नत्वे सति तद्गतभूयोध
र्मवत्त्वं यथा चंद्र भिन्नत्वे सति चंद्रगताल्हादकत्वादिमत्त्वं मुखे चंद्रसादृश्यमिति द्रव्याणि विभजते क्षित्यप्तेजोमरु
द्व्योमकालदिग्देहिनो मनः द्रव्याणीति। क्षितिः पृथिवी देही आत्मा एतानि नव द्रव्याणीत्यर्थः ननु द्रव्यत्वजातौ किं मा मनः
नं न हि प्रत्यक्षं तत्र प्रमाणं घटतेजःप्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न कार्यसमवायिकारणतावच्छेदकतया संयोगस्य वि
भागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेरिति ननु दशमं द्रव्यं तमः कुतो नोक्तं तद्धि प्रत्यक्षेण गृह्यते
तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वं सिद्धं तच्च गंधशून्यत्वात् न पृथिवी नीलरूपवत्त्वान्न जलादिकं तमसश्चालोक व
निरपेक्षं चक्षुः कारणमिति चेन्न आवश्यकतेजोभावेनोपपत्तौ द्रव्यांतरकल्पनाया अन्याय्यत्वात् रूपवत्ताप्रतीतिस्तु भ्र
मरूपा कर्मवत्ताप्रतीतिरप्यालोकापसारणोपाधिकी भ्रांतिरेव तमसो ऽतिरिक्तत्वे ऽनंतावयवादिकल्पनागौरवं स्यात् सु च
वर्णं यथा तेजस्य तमोभावस्तथाग्रे वक्ष्यते गुणान् विभजते अथ गुणा रूपं रसो गंधस्ततः परं स्पर्शः संख्या परिमितिः
पृथक्त्वं च ततः परं संयोगश्च विभागश्च परत्वं चापरत्वकं बुद्धिः सुखं दुःखमिच्छा द्वेषो प्रयत्नो गुरुत्वकं द्रवत्वं स्नेह संस्का एम २

स्य ...वव तमोव्यवहारोपपत्तौ ४

रावदएवंशब्दएव च। एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कंठतः चशब्देन च दर्शिताः तत्र गुणत्वजातिसिद्धिरग्रे वक्ष्यते क
र्माणि विभजते उत्क्षेपणं ततोऽपक्षेपणमाकुंचनं तथा प्रसारणं च गमनं कर्माण्येतानि पंच च कर्मत्वजाति[illegible]स्तु प्रत्यक्ष
सिद्धा एवमुत्क्षेपणत्वादिकमपि ननु भ्रमणादिकमपि कर्माधिकतया पंचकं कुतो नोक्तमत आह भ्रमणं रेचनं स्यंदनोर्द्ध्व
ज्वलनमेव च तिर्यग्गमनमप्यत्र गमनादेव लभ्यते सामान्यं निरूपयति सामान्यं द्विविधं प्रोक्तं परं चापरमेव च तल्लक्षणं तु नित्यत्वे तदिदमारभ्य मुक्तावली न मूले
सत्यनेकसमवेतत्वं अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तं नित्यत्वे सतीति नित्यत्वे सति समवेतत्वं गगनपरिमाणादाव
प्यस्त्यत उक्तं अनेकेति नित्यत्वे सत्यनेकवृत्तित्वमत्यंताभावस्याप्यस्त्यतो वृत्तिसामान्यं विहाय समवेतत्वमुक्तं एकमात्रव्यक्तिवृ
त्तिस्तु न जातिः तथा चोक्तं। व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः रूपहानिरसंबंधो जातिबाधकसंग्रहः॥ द्रव्यादित्रिकवृ
त्तिस्तु सत्ता परतयोच्यते॥ परभिन्ना तु या जातिः सैवापरतयोच्यते द्रव्यत्वादिक[illegible] जातिस्तु परापरतयोच्यते॥ परत्वमधिकदेशवृ त
देश त्तित्वं अपरत्वमल्पदेशवृत्तित्वं सकलजात्यपेक्षया अधिकवृत्तित्वात्सत्तायाः परत्वं तदपेक्षयान्यासां जातीनामपरत्वं व्याप चा
कत्वात्सत्ता[illegible]पि स्याद्द्रव्यत्वादपरापि च पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात् परत्वं सत्तापेक्षया व्याप्य
त्वादल्प[illegible]देशवृत्तित्वात् द्रव्यत्वस्यापरत्वं विशेषं निरूपयति अंत्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः अंतेऽवसाने यो वर्तते
सोंत्यः यदपेक्षयाऽन्यः विशेषो नास्तीत्यर्थः घटादीनां द्व्यणुकपर्यंतानां तत्तदवयवभेदात्परस्परं भेदः परमाणूनां अवयवाभा

तथा च धर्मद्वयसमावेशादुभयमविरुद्धं २ द्रव्यत्वस्य ३

न्या०सि०मु०

वैशिष्ट्यस्य तत्र सत्वात् तस्य चानित्यत्वात् ८ तत्र

३ वात् परस्परं भेदको विशेषएव स्तु स्वतएव व्याव र्त्तः तेनैवं विशेषांतराये क्षानास्तीति भावः समवायं दर्शयति घटादीनां कपाला

दौ द्रव्येषु गुणकर्मणोः तेषु जातेश्च संबंधः समवायः प्रकीर्तितः अवयवावयविनो र्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतो

र्नित्यद्रव्यविशेषयोश्च यः संबंधः स समवायः [redacted] समवायत्वं नित्यसंबंधत्वं तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिः

विशेषणविशेष्यसंबंधविषया विशिष्टबुद्धित्वात् दंडी पुरुष इति विशिष्टबुद्धिवत् इत्यनुमानेन संयोगादिबाधात् समवायसिद्धिः नमेव ४॥

[redacted] रूपाणां संबंधत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धिः नच समवायस्यैकत्वे वा

रू यौपवनादौ बुद्धिप्रसंगः तत्र रूपसमवायसत्वेपि रूपाभावात् नचैवं अभावस्यापि वैशिष्ट्यं संबंधांतरं सिद्ध्येदिति वाच्यं तस्य नि

त्यत्वे भूतले घटानयनानंतरमपि घटाभावबुद्धिप्रसंगात् घटाभावस्य तत्र सत्वात् तस्य नित्यत्वात् अन्यथा देशांतरेपि न स्यादिति च

नित्यात् मम तु घटे पाकरक्तता दशायां श्यामरूपस्य नष्टत्वान्न तद्बुद्धिः वैशिष्ट्यस्यानित्यत्वे त्वनंतवैशिष्ट्यकल्पने तवैव

रावंच गौरवं इत्थं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां संबंधः अभावं विभजते अभावस्तु द्विधा संसर्गोन्याभावभेद स

व तः अभावत्वं द्रव्यादिषट्कान्योन्याभावत्वं संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः अभाव अन्योन्याभावस्यैकविधत्वा

त्तद्विभागाभावात् संसर्गाभावं विभजते प्रागभावस्तथा ध्वंसोप्यत्यंताभाव एव च एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते संसर्गाभाव

त्वं नित्य अन्योन्याभावभिन्नाभावत्वं अन्योन्याभावत्वं तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं विनाश्यभावत्वं प्रागभाव

त्वे जन्याभावत्वे ध्वंसत्वं नित्यसंसर्गाभावत्वं अत्यंताभावत्वं यत्र भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटका राम

नच स्वरूपसंबंधेन सिद्धसाधनमर्थांतरं वा अनंतस्व ९ तु

ता लसंबंधाघटकतया अत्यंताभावस्य नित्यत्वेपि घटकालेन घटात्यंताभावबुद्धिः तत्रोत्पादविनाशशाली चतुर्थोयमभाव इति केचित्
अत्र ध्वंसप्रागभावाधिकरणे नात्यंताभाव इति प्राचांमतं श्यामघटे रक्तो नास्ति रक्तघटे श्यामो नास्तीति धीः प्रागभावं ध्वंसं चावगाह
तपो ते ननु तदत्यंताभावं विरोधात् नव्यास्तु तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदे नात्यंताभावो वर्त्तत इत्याहुः नव्य भावाना त्व
मधिकरणात्मत्वं लाघवादिति चेन्न अनंताधिकरणात्मकत्वापेक्षयातिरिक्तकल्पनाया एव लघीयस्त्वात् एवं चाधाराधेयभावो कल्पनाः
कृ गंधश्च प्युपपद्यते एवं तत्तच्छब्दरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते अन्यथा तत्तदधिकरणानां तत्तदिंद्रियाग्राह्यत्वात् प्रत्यक्षत्वं स्या
त् एतेन ज्ञानविशेषकालविशेषाद्यात्मत्वमत्यंताभावस्येत्यपि प्रत्युक्तं अप्रस्तुतत्वाय तैः इदार्थानां साधर्म्यवैधर्म्यवक्तुं प्रक्रमते क
न सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते समानो धर्मो येषां ते सधर्माणः तेषांभावः साधर्म्यं समानो धर्म इति फलितोर्थः एवं वि
रुद्धो धर्मो येषां ते वि[illegible]धर्माणः तेषांभावः वैधर्म्यं विरुद्धो धर्म इति फलितोर्थः ज्ञेयत्वं ज्ञानविषयता सा च सर्वत्रैवास्ति ईश्वरज्ञान
विषयतायाः केवलान्वयित्वात् एवं अभिधेयत्वप्रमेयत्वादिकमपि बोध्यं द्रव्यादयः पंचभावा अनेके समवायिनः द्रव्यगुणकर्म
भावत्वं सामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वं च यद्यप्यनेकत्वमभावेप्यस्ति तथाप्यनेकत्वे सति भावत्वं पंचानां साधर्म्यं तथा चा
नेकभाववृत्ति यत्पदार्थविभाजकोपाधिमत्त्वं फलितोर्थः तेन प्रत्येकं घटादौ नाव्याप्तिः समवायित्वं समवायसंबंधेन संबंधित्वं ननु
समवायवत्त्वं सामान्यादावभावात् सत्तावंतस्त्रयस्त्वाद्या इति द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः गुणादिर्निर्गुणः क्रियः यद्यपि
समवेत इति पदार्थविभाजकोपाधिमत्त्वं फलितोर्थः तेन नित्यद्रव्येषु समवेतत्वाभावेपि
नाव्याप्तिः ॥१॥

नीपत्र ९

च अर

पिगुणक्रियान्यत्वमाद्यस्य रोषघटादावतिव्याप्तं क्रियान्यत्वं गगनादावतिव्याप्तं तथापि गुणवद्वृत्तिधर्मवत्त्वं कर्मवद्वृत्तित्रियदार्थ
त्वा विभाजकोपाधिमत्त्वं तदर्थः नहि घटादिकं द्रव्यत्वं वा गुणवद्वृत्ति कर्मवद्वृत्ति वा किंतु गुणत्वादिकं तथा आकाशत्वादिकं तु न प
दार्थविभाजकोपाधिः सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः पारिमाण्डल्यभि
न्नानां कारणत्वमुदाहृतं पारिमाण्डल्यमणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः अणुपरिमाणं तु न कस्यापि कारणं तद्धि स्वाश्र
यारब्धद्रव्यपरिमाणारंभकं भवेत् तच्च न संभवति परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्व महदारब्धस्य महत्तर नियमात्
म त्ववदणुजन्यस्याणुतरत्वप्रसंगात् एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च वोध्याः इदमपि योगिप्रत्यक्षविषयस्य न का
रणत्वं ज्ञायमानसामान्यं न प्रत्यासत्तिः ज्ञायमानं लिंगं नानुमितिकरणमित्यभिप्रायेण आत्मान प्रत्यक्षे आत्ममहत्त्वस्य कारणत्वा आत्म
त् परमम हत्परिमाणमाकाशादेर्वोध्यं तस्यापि न कारणत्वमित्याचार्याणामाशयः इदं समे तन्न ज्ञानातिरिक्तं प्रत्यक्षकारणतायां
एवाचार्यैरुक्तत्वात् ननु कारणत्वं किमत आह अनन्यथासिद्धिनियतपूर्ववृत्तिता कारणत्वं भवेत्तत्तु त्रिविधं परिकीर्तित
त्पर्थः॥ मिति तस्य कारणत्वस्य समवायि कारणत्वं ज्ञेयमथाप्यसमवायि हेतुत्वं एवं न्यायनयज्ञैस्तु तृतीयमुक्तं निमित्तहेतुत्वं १७ यत्स
मवेतं कार्यं भवति ज्ञेयं तु समवायि जनकं तत् तत्रासन्नं जनकं द्वितीयमाप्यरं तु तृतीयं स्यादिति तत्र समवायिकारणे प्रत्यास मा
न्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः अत्र यद्यपि तुरीतन्तुसंयोगे पटासमवायिकारणत्वं स्यात् एवं वेगादीनामभिघा णा

म

ताद्यसमवायिकारणत्वं स्यात् एवं ज्ञानादीनामिच्छाद्यसमवायिकारणत्वं स्यात् तथापि परासमवायिकारणलक्षणे तुरीतंतुसंयो
गभिन्नत्वं देयं तुरीतंतुसंयोगस्तु तुरीपटसंयोगं प्रति असमवायिकारणं भवत्येव एवं वेगादिके वेग स्पंदनाद्य समवायिकार
वे णं भवत्येति तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयं आत्मविशेषगुणानां तु कुत्राप्यसमवायिका
रणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव अत्र समवायिकारणे प्रत्यासन्नं द्विविधं कार्यैका र्थप्रत्यासत्त्याकारणै
कार्थप्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्यैकस्मिन् क
पाले प्रत्यासत्तिरस्ति द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणं तत्र घटरूपं प्रति कारणं घटस्तेन सह कपालरूपस्यै म
स्व कस्मिन् कपाले प्रत्यासत्तिरस्ति तथा च क्वचित् समवायसंबंधेन क्वचित् समवायसमवायसंबंधेनेति फलितोऽर्थः इत्थं च कार्यैकार्थका पि
रणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नमसमवायिकारणं तृतीयं निमित्तकारणमित्यर्थः इदानीमन्यथासि
द्धत्वमेव कियत्तन्नदाह येन सह पूर्वभाव इति यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथा ण
सिद्धमित्यर्थः यथा घटं प्रति दंडत्वमिति द्वितीयमन्यथासिद्धमाह कारणमादाय वा यस्येति यस्य स्वातंत्र्येणान्वयव्यतिरे
तंप्रति कौ न स्तः किं तु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धं यथा दंडरूपं तृतीयमाह अन्यं प्रति पूर्वभावे ज्ञाते य घटंप्रति
त्पूर्वभावविज्ञानमिति अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासि

स्य

मितित्वामाव्यतीत्त्वश्च सां पूर्वसमवं ॥ आभ्यामसमवायिकारणसमवायिकारणाभ्यां भिन्नं प परं

म

सि०मु० ५ दूत्वं यथा घटादिकं प्रत्याकाशस्य आकाशस्य हि घटादिकं प्रति कारणत्वं आकाशत्वेन स्यात् आकाशत्वं शब्दसमवायिकारणत्वं अ
तश्च शब्दं प्रतिजनकत्वं गृहीत्वैव घटादिकं प्रतिजनकत्वं ग्राह्यं अतस्तदन्यथासिद्धं शब्दाश्रयत्वेन तस्य कारणत्वे कान्यथासिद्धि
गृहासा श रिति चेत् पंचमीति अथाकाशस्य शब्दं प्रतिजनकत्वे किमवच्छेदकमिति चेत् कवत्वादिकं विशेषपदार्थो वेति चतुर्थमन्यथासि
५ म द्धमाह जनकं प्रतिपूर्ववर्त्तितां परिज्ञायनयस्य गृह्यते इति यत्कार्यजनकं प्रतिपूर्ववर्त्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्वव
र्त्तितां परिज्ञायनयनस्य गृह्यते इति यत्कार्यजनकं प्रतिपूर्ववर्त्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रतिपूर्ववर्त्तित्वं गृह्यते तस्य तत्
कार्यं प्रति अन्यथासिद्धत्वं यथा कुलालपितुर्घटं प्रति तस्य कुलालपितृत्वेन घटं प्रतिजनकत्वे अन्यथासिद्धिः कुलालत्वरू
त पेण जनकत्वे विशापत्तिः कुलालमात्रस्य घटं प्रतिजनकत्वात् पंचममन्यथासिद्धमाह अतिरिक्तमथापि यन्नियतावश्य
कपूर्ववर्त्तिनः इति अवश्यक्लृप्तनियतपूर्ववर्त्तिन एव कार्यसंभवे तत्सहभूतमन्यथासिद्धमित्यर्थः अत एव अनेकमहत्वे कारणमनेकद्रव्य
वत्त्वमन्यथासिद्धं तत्र हि महत्वमवश्यक्लृप्तं तेनानेकद्रव्यत्वमन्यथासिद्धं न च वैपरीत्ये किं विनिगमकमिति वाच्यं महत्वस्य जातेः
: कारणतावच्छेदकत्वे लाघवात् एतेषं चान्यथासिद्धानां दण्डत्वादिकमाद्यं घटादौ दण्डरूपादि द्वितीयमपि दर्शितं तृतीयं अनुमवे
द्योमकुलालजनकोपरः पंचमो रासभादिः स्यादिति यद्यपि तत्तद्घटं प्रति रासभस्यापि पूर्ववर्त्तित्वमस्ति तथापि घ
टजातीयं प्रति सिद्धकारणाभावे दण्डादिभिरेव तद्घटस्यापि संभवे रासभोऽन्यथासिद्ध इति भावः एतान्येवाह दण्डादिभिरेव एत

ष्यावश्यकत्वसत्त्वादिति एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पंचमोऽन्यथासिद्धोऽवश्यकः नेतैवञ्चेषां ५ अ
न्या ॥चरितार्थत्वात्॥त

५ कालिकविशेषणतासंबंधेनवृत्तित्वमितिपरमार्थः तेनसमवायस्यसमवायेनावृत्त्यापिनक्षतिः ५

स्यकृत्तनियतपूर्ववर्तिभिरेवकार्यसंभवेदंडत्वादिकमन्यथासिद्धं नचैवंपरीत्येकिंविनिगमकमितिवाच्यं दंडत्वस्यकारणत्वेदंड
घटितपरंपरायाः संबंधत्वेगौरवात् एवमन्येषामप्यनेनचरितार्थत्वंसंभवति समवायिकारणत्वंद्रव्यस्यैवेतिविज्ञेयं सध
गुणकर्ममात्रवृत्तिज्ञेयमथाप्यसमवायिहेतुत्वमिति असमवायिकारणत्वंगुणकर्मभिन्नानांवैधर्म्यंनतुगुणकर्मणोः सा
धर्म्यमित्यत्रापितात्पर्यं अथवाअसमवायिकारणवृत्तिसत्ताभिन्नजातिमत्वं र्थः तेनज्ञानादीनामसमवायिकार तद
णत्वविरहेपिनाव्याप्तिः अन्यत्रनिसद्धत्वमन्याश्रितत्वमिहोच्यते विशेषणतयानित्यानामपिकालो वृत्तेः इदानीद्र
व्यस्यैवविशिष्यसाधर्म्यंवक्तुमुपक्रमते क्षित्यादीनांनवानांतुद्रव्यत्वगुणयोगिता क्षितिर्जलंतथातेजः पवनोमनएवच परा न
परत्वमूर्तत्वक्रियावेगाश्रयाअमीति पृथिव्यतेजोवायुमनसांपरत्वापरत्ववत्त्वंमूर्तत्ववत्त्वंकर्मवत्त्वंवेगवत्त्वंचसाध
र्म्यं नचयत्रघटादौपरत्वमपरत्वंवानोत्पन्नंतत्राव्याप्तिरितिवाच्यं परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्वस्यवि
वक्षितत्वात् मूर्तत्वमपकृष्टपरिमाणवत्वं तच्चैषामेव गगनादिपरिमाणस्यकुतोप्यपकृष्टत्वाभावात् पूर्ववत्कर्मवत्त्वंकर्म म
समानाधिकरणद्रव्यत्वव्याप्यजातिमत्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वंचबोध्यं कालखात्मदिशांसर्वगतत्वंपरमंमहत् दि
ति कालाकाशात्मदिशांसर्वगतत्वंसर्वमूर्तसंयोगित्वंपरममहत्त्वंच परममहत्वत्वंजातिविशेषः अपकर्षानाश्रयपरि
माणत्वंवा क्षित्यादिपंचभूतानीति पृथिव्यप्तेजोवाय्वाकाशानांभूतत्वं तच्चबहिरिंद्रियग्राह्यविशेषगुणवत्वं अ

~~सिमहत्वेमूलतासांतत्संसमवाभावचयोरमिसंसदः~~ ॥नित्यद्रव्याणिपरमाणवाकाशादीनिविहाय आश्रितत्वंसाधर्म्यमित्यर्थः॥ आश्रितत्वंसमवायसंबंधेन १३

हृत्तिलं ८

प्र स्त्वं विषयतावच्छेदकधर्मेव त्वं।

स्वरूप २

मा॰ सि॰ ६ नयासत्वंलौकिकप्रत्यक्ष स्वरूपयोग्यत्वंबोध्यंतेनज्ञातो घटइतिप्रत्यक्षेज्ञानस्याप्युपनीतभानविषयत्वात्तद्वति आ
त्मनिनातिव्याप्तिः नवात्मत्वस्याविषयरूपादिमतिभ्रमाएवादाव व्याप्तिः तस्यापियोग्यत्वान्महत्वलक्षणकारणांतरासं
6 न निधानाच्चप्रत्यक्षत्वं अथवा आत्मावृत्तिविशेषगुणवत्वं त्वं चत्वारिस्पर्शवंतिहीति पृथिव्यप्तेजोवायूनांस्पर्शवत्वं द्रव्या त्वं
रंभकत्वंस्यादिति पृथिव्यप्तेजोवायुषुचतुर्षु द्रव्यारंभकत्वं नचद्रव्यानारंभकेघटादावव्याप्तिः द्रव्यसमवायिकारणाव
त्तिद्रव्यत्वव्याप्यजातिमत्वस्यविवक्षितत्वात् अथाकाशशरीरिणां अव्याप्यवृत्तिक्षणिकोविशेषगुणउच्यतेइति
आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्वं आकाशस्यविशेषगुणःशब्दः सचाव्याप्यवृत्तिः यतःकिंचिदव
च्छेदेनशब्दउत्पद्यतेतदभावच्छेदेनतदभावस्यापिसत्वात्क्षणिकत्वंचतृतीयक्षणवृत्तिध्वंसप्रतियोगित्वंयोग्यविभु
विशेषगुण विशेष गुणानांस्वोत्तरवर्त्तिनाश्यत्वात्प्रथमशब्दस्यद्वितीय शब्देननाशः एवंज्ञानादीनामपिज्ञानादिकंहिआ
त्मनिविभोशरीरावच्छेदेनोत्पद्यते घटाद्यवच्छेदेनतदभावोस्त्येव एवंज्ञानादिकमपिक्षणा [illegible]
द्रूपस्यापि [illegible] अव्याप्यवृत्तिविशेषगुणवत्वंक्षणिकविशेषगुणवत्वंचार्थः पृथिव्यादौरूपादिविशेषगुणोप्यस्तीति
अव्याप्यवृत्तीत्युक्तं पृथिव्यादौअव्याप्यवृत्तिसंयोगादिरस्तीतिविशेषगुणेत्युक्तं नचरूपादीनामपिकदाचित्तृतीयक्ष
णेनाशसंभवात्क्षणिकविशेषगुणवत्वंक्षित्यादावतिव्याप्तमितिवाच्यंचतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्वस्यतदर्थे राम॰ ६

त्वात् अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतुष्टं न किमपि ज्ञानादिकं तिष्ठति ऐत्वादिकं तु क्षणचतुष्टयस्थायि न्यापि रूपादौ वर्त्तते तद्
तितन्युदासः ईश्वरज्ञानस्य चतुःक्षणावृत्तित्वात् ज्ञानत्वस्य तद्वृत्तित्वाज्जमेयुक्तं यथाकाशजीवात्मनोः साधर्म्यं तदाजमेति
त्वा नदेपं द्वेष दिकमादाय लक्षणसमन्वयात् परममहत्त्वस्य तादृशगुणत्वान्न चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपगमात् लक्षण
द्वित्वादीनामपि तथात्वात्तद्वारणाय विशे [illegible] षेति त्रिक्षणावृत्तित्वं वा वाच्यं इच्छादिकमादाय आत्मनि समन्व
यात् रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयपदार्थाः इति पृथिव्यप्तेजसां रूपवत्त्वे द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं चेत्यर्थः नच चक्षुरादीनां पृ
भर्जनकपालस्थवह्ने रूपक्षणाश्च रूपवत्त्वे किंमानमिति वाच्यं तत्रापि तेजस्त्वेन रूपानुमानात् एवं बाधानी पृथिवीजलतेजो
भागानामपि पृथि ~~[illegible]~~
~~[illegible]~~ वीत्वादिना रूपानुमानं बोध्यं नच घटादौ कृतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वम
मि व्याप्तमिति वाच्यं द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् घृतजतुप्रभृतिषु पृथिवीषु जलेषु द्रुतसुवर्णादौ ते
स जसि च द्रवत्वसत्त्वात्तत्र च पृथिवीत्वादि सत्त्वात्तदादाय सर्वत्र समन्वयः नच प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तमिति व्या लक्षण
प्यं वरूपादाविति वाच्यं चक्षुर्षप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आत्ममतिव्याप्तिवारणाय चा
चा क्षुषे [illegible] ति गुरुणी द्विरसवतीति गुरुत्ववत्त्वं रसवत्त्वं च पृथिवीजलयोरित्यर्थः नच घ्राणेन्द्रियादीनां बाधानामा

लौकिक २

२३

मा॰सि॰
७
भावार

पार्थिवादिभागानां च रसादिमत्त्वे किंमानमितिवाच्यं तत्रापि पृथिवीत्वादिनातदनुमानात् द्वयोर्नैमित्तिकोद्रवइति पृथिवीतेज
सोरित्यर्थः नचैनैमित्तिकद्रवत्ववत्त्वं घटादेर्वह्न्यादेर्वाव्याप्तमितिवाच्यं नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्य
जातिमत्त्वस्यविवक्षितत्वात् आत्मनोमूर्त्तवर्गेष्वविशेषगुणायोगिनइति पृथिव्यप्तेजोवाय्वाकाशात्मनांविशेषगुणवत्त्व
मित्यर्थः यदुक्तंयस्यसाधर्म्यवैधर्म्यमिमितस्यतत्तदितिज्ञेयत्वादिकंविहायेतिबोध्यं तत्तुनकस्यापिवैधर्म्यंकेवलान्वयित्वा
त् वायोर्नवेकादशतेजसोगुणाः जलक्षितिप्राणभृतांचतुर्दशदिक्कालयोःपंचषडेवचांबरमहेश्वरेष्टौमनसस्तथैवचे
तिसंख्या स्पर्शादयोष्टौवेगाख्यसंस्कारोमरुतोगुणाः स्पर्शाद्यष्टौरूपवेगौद्रवत्वंतेजसोगुणाः ३० स्पर्शादयोष्टौवेगश्चद्र
वत्वंचगुरुत्वकं रूपंरसस्तथास्नेहोवारिण्येतेचतुर्दश ३१ स्नेहहीनागंधयुक्ताः क्षितावेतेचतुर्दश बुद्ध्यादिषट्कंसंख्या
दिपंचकंभावनातथा ३२ धर्माधर्मौगुणाएते आत्मनःस्युश्चतुर्दश संख्यादिपंचकंकालदिशोःशब्दश्चतेचखे ३३ सं
संख्यादयःपंचबुद्धिरिच्छायत्नोपिचेश्वरे परापरत्वेसंख्यादिपंचवेगश्चमानसे ३४ तेचसंख्यादयःपंचखेआकाशेसा
धर्म्यवैधर्म्येनिरूप्यसंप्रतिप्रसक्तंपृथिव्यादिकंनिरूपयतितत्रक्षितिरित्यादिना गंधहेतुरिति गंधसमवायिकारणमित्यर्थः
यद्यपिगंधवत्त्वमात्रंपृथिव्याःलक्षणमुचितंतथापिपृथिवीत्वजातौप्रमाणोपन्यासायकारणत्वमुपन्यस्तं तथाहिपृ
थिवीत्वंहिगंधसमवायिकारणतावच्छेदकतयासिद्ध्यति अन्यथागंधत्वावच्छिन्नगंधस्याकस्मिकत्वापत्तेः नचया

मु

रूपे
तत्रक्षिति २
मु
७

प

पाषाणादौ गंधाभावाद्गंधवत्त्वमव्याप्तमिति वाच्यं तत्रापि गंधसत्त्वात् अनुपलब्धिस्तु अनुत्कटत्वेनाप्युपपद्यते कथमन्यथा तद्भस्मनि
गंधउपलभ्यते भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सिध्यति यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानो
पादेयमिति व्याप्तेः इत्थं चैतत् खंडपटे [redacted] महापटध्वंसजन्ये दृष्टं च पाषाणापरमाणोः पृथिवीत्वात् ज्जन्यपाषाण
स्यापि पृथिवीत्वं तथा च तस्यापि गंधवत्त्वे बाधकाभावः नानारूपवतीमतेति शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथि
व्यामेव वर्त्तते न तु जलादौ तत्र शुक्लस्यैव सत्त्वात् पृथिव्यां तु कस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभवात् न च यत्र नाना
रूपं नोत्पन्नं तत्राव्याप्तिरिति वाच्यं रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजा
वा तिमत्त्वस्यैव वाच्यत्वात् वैशेषिकनये पृथिवीपरमाणोरूपनाशस्य रूपांतरस्य च सत्त्वात् नापि घटादावपि तत्सत्त्वात् एवं रस वी = न
मत्त्वयः षड्विधस्तु रसस्तत्रेति मधुरकटुकषायादिभेदेन यः षड्विधो रसः स पृथिव्यामेव जले मधुर एव रसः अत्रापि पूर्ववत् रसद्व
यवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थी वोध्यः गंधस्तु द्विविधो मत इति द्विविध इति वस्तुस्थितिमात्रं न तु द्विविधगंधव
त्वमपि लक्षणं द्विविधत्वस्य व्यर्थत्वात् द्वैवि [redacted] ध्यं च सौरभासौरभभेदेन बोध्यं स्पर्शस्तस्यास्तु
विज्ञेयो ह्यनुष्णाशीतपाकज इति तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्त्तत इत्यत उक्तं पाकज इति इत्थं च पृथि
व्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तौ ॥ याकजस्पर्शवत्त्वमात्रं लक्षणं अधिकस्य वैयर्थ्यात् यद्यपि पाकजः स्पर्शः प

दुक्तं वस्तुतस्तु

नचस्पर्शपाकजत्वेकिंमानंरूपादिवदनुपलब्धेरितिवाच्यं पार्थिवस्पर्शः पाकजः पृथिवीविशेषगुण
त्वात् गंधवदित्यनुमानात् नचेदमप्रयोजकं यदि पृथिवीस्पर्शः पाकजो नस्यात् संख्यादिवदविशिष्टः स्यादित्यनुकूल तर्कसत्वात् १

न्या० सि० ८

दादौनास्तितथापिपाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वमर्थोबोध्यः॥ नित्यानित्याचसा द्वेधानित्यास्यादणुलक्षणा अनि
त्यातुतदन्यास्यात्सैवावयवयोगिनीति साप्टथिवीद्विधानित्यानित्याचेत्यर्थः अणुलक्षणा परमाणुरूपा पृथिवीनित्या
तदन्यापरमाणुभिन्नाद्व्यणुकादि सर्वाप्यनित्याऽत्सर्थः सैवानित्या ... पृथिव्येवावयववती सर्थः ननु अवयविनि किं
मानंपरमाणुपुंजैरेवोपपत्तेः नचपरमाणूनामतींद्रियत्वात्घटादीनांप्रत्यक्षत्वंनस्यादितिवाच्यं एकस्यपरमाणोरप्र
ते त्यक्षेपितत्समूहस्यप्रत्यक्षत्वात् यथैकस्यकेशस्यदूरेऽप्रत्यक्षत्वेपितत्समूहस्यप्रत्यक्षत्वंनचैकः स्थूलोघटइतिबुद्धेरनु
पपत्तिरितिवाच्यं एकोमहान्धान्यराशिरितिवदुपपत्तेः मैवंपरमाणोरतींद्रियत्वेननतत्समूहस्यापिप्रत्यक्षत्वायोगात् दूर ल
स्थकेशस्तुनातींद्रियः सन्निधानेतस्यैवप्रत्यक्षत्वात् नचतदानींदृश्यपरमाणुपुंजस्योत्पन्नत्वात्नप्रत्यक्षविरोधइतिवाच्यं
स्य अदृश्यैर्दृश्यानुपादानात्संततेर्दृश्यदहनोत्पत्तिरितिवाच्यं तत्रतदंतःपातिभिः दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमा
त् नचादृश्येनद्व्यणुकेनकथंदृश्यत्रसरेणोरुत्पत्तिरितिवाच्यंयतोनवयवेदृश्यत्वमदृश्यत्वंवाकस्यचित्स्वभावादाचक्ष्महे म परंतु
हत्वोद्भूतरूपादिकारणसमुदायवशाद्दृश्यत्वं तदभावेचादृश्यत्वं तथाचत्रसरेणोर्महत्वात्प्रत्यक्षत्वं ननुद्व्यणुकादे
तत्र त स्तदभावात्नहित्वन्मतेयीदंसंभवति परमाणोर्महत्वाभावात् द्रव्येचावयविसिद्धौतेषा मुत्पादविनाशयोः प्रत्यक्षसिद्धत्वा
पा दनित्यत्वंतेषांचा ... वयवधाराऽनंतत्वेमेरुसर्षपयोरपिसाम्यप्रसंगः। अतः क्वचिद्विश्रामोवाच्यः यत्रतुविश्रामः एम ८
त्वात् तन्न्यपाचक्षुरूपादिसंततौकदाचिद्दृश्यत्वप्रसंगात् नचातितप्ततैलादौकथमदृश्यदहन ५

तस्यानित्यत्वे असमवेतकार्योत्पत्तिप्रसंगात्तस्य नित्यत्वं महत्परिमाणतारतम्यस्य गगनादौ विश्रांतत्वमिव अणुपरिमाणतारत
म्यस्यापि क्वचिद्विश्रांतत्वमस्तीति तस्य परमाणुत्वसिद्धिः नच त्रसरेणावेव विश्रामोस्त्विति वाच्यं त्रसरेणुः सावयवः चा
क्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवाः महदवयवत्वात् कपालवदित्यनुमानेन तद" वयवानाम
वयवसिद्धेः नचेदमप्रयोजकं अपकृष्टमहत्त्वं प्रति अनेकद्रव्य त्वस्य प्रयोजकत्वात् नचैवं क्रमेणानंतावयवधारापि सिद्धे
दिति वाच्यं अनवस्थाभयेन तदसिद्धेरिति साच त्रिधा भवेद्देहइंद्रियं विषयस्तथेति साकार्यरूपा पृथिवी त्रिविधा शरीरेंद्रि
प यविषयभेदादित्यर्थः तत्र देहमुदाहरति योनिजादिभवेद्देहइति योनिजमयोनिजं चेत्यर्थः योनिजमपि द्विविधं जरायुजमंड
जं च जरायुजं मानुषादीनां अंडजं सर्पादीनां अयोनिजं स्वेदजोद्भिज्जादिकं स्वेदजा मशकादयः उद्भिज्जाः तरुगुल्मादयः ना दि=स्त
रकीणां शरीरमप्ययोनिजं तच मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यं गंधादिमत्त्वस्यैव प्रमाणत्वात् नच क्लेदो
ष्मादिरूपलंभादाप्यत्वादिकमपि स्यादिति वाच्यं तथा सति जलत्वपृथिवीत्वादिना संकरप्रसंगात् नच तर्हि जलत्वादिकमे
वास्तु न तु पृथिवीत्वमिति वाच्यं क्लेदादीनां विनाशेपि शरीरत्वेन प्रत्यभिज्ञानात् गंधाद्युपलब्धेश्च पृथिवीत्वसि
द्धेः तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यं शरीरत्वं तु न जातिः पृथिवीत्वादिना सांकर्यात् किंतु चेष्टाश्रयत्वं
म वृक्षादीनामपि चेष्टासत्त्वान्नाव्याप्तिः चेष्टा च हिताहितप्राप्तिपरिहारार्था क्रिया न तु स्पंदमात्रं रथादावतिव्याप्तेः

न्या०सि० ६

नचवस्त्रादेः शरीरत्वे किंमानमिति वाच्यं आध्यात्मिकवायुसंबंधस्य प्रमाणत्वात् तत्रैव किंमानमिति चेत् भग्नक्षतसंरोहणादिना त
दुन्नयनात् यदि हस्तादेः शरीरव्यवहारो न संभवति तदावयवित्वं विशेषणीयं नचयत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वा
वाच्यं तादृशे प्रमाणाभावात् अथवा चेष्टावदंत्यावयविवृत्तिद्रव्यत्वव्याप्य जातिमत्त्वं तत् अंत्यावयविमात्रवृत्तिचेष्टावद्
वृत्तिजातिमत्त्वं वा मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः नचनृसिंहशरीरे कथं तत्र लक्षणसमन्वयः तत्र नृसिंहत्व
स्यैकव्यक्तिवृत्तितया जातित्वाभावात् जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यं कल्पभेदेन नृसिं
हशरीरस्य नानात्वेन नृसिंहजात्या लक्षणसमन्वयात् इंद्रियं घ्राणलक्षणमिति घ्राणेंद्रियं पार्थिवमित्यर्थः पार्थिवत्वं कथ
मिति चेत् इत्थं घ्राणेंद्रियं पार्थिवं रूपादिषु पंचसु मध्ये गंधस्यैव व्यंजकत्वात् कुंकुमगंधाभिव्यंजकघृतादिवत् नचदृष्टांते स्वीयरू
पादि[illegible] व्यंजकत्वाद्दृष्टांतासिद्धिरिति वाच्यं परकीयरूपाद्यव्यंजकत्वस्य तदर्थत्वात् नच नवशरावगंधव्यंजके जलेनानै
कांतिकमिति वाच्यं तस्य सक्तुरसाभिव्यंजकत्वात् यद्वा परकीयेति न देयं वायूपनीतसुरभिभागस्य दृष्टांतत्वे भवात् नच घ्राणेंद्रि
यसंनिकर्षस्य गंधमात्रव्यंजकत्वात्तत्र व्यभिचार इति वाच्यं द्रव्यत्वे सतीति विशेषणात् विषयो घ्राणकादिस्तु ब्रह्मांडांत उदाहृत इति उ
पभोगसाधनं हि विषयः सर्वमेव हि कार्यजातमदृष्टाधीनं यच्च कार्यं यददृष्टाधीनं तत्तदुपभोगसाक्षात्परंपरया वा जनयत्येव न
हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्तीति तद्घ्राणकादिब्रह्मांडांतं सर्वमेव विषयो भवति शरीरेंद्रिययोर्विषयत्वेपि प्रकारां

नरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः जलं निरूपयति वर्णः शुक्ल इति स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिध्यति यद्यपि
स्नेहत्वं नित्यानि सर्वत्रितयानकार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यं अथ परमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाभावात् तस्य
नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमादिति चेन्न जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकता
वच्छेदकतया जलत्वजातिसिद्धेः शुक्लरूपवत्त्वमेव जलस्येति दर्शयितुं शुक्लं वर्णः शुक्ल [illegible] इति ननु शुक्लरूपवत्त्वं लक्षणं अथ वा
नैमित्तिकद्रवत्ववदवृत्तिशुक्लरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसा
क्षाद्व्याप्यजातिमत्त्वं वा तदर्थः तेन स्फटिकादौ नातिव्याप्तिः रसस्पर्शौ जले मधुरशीतलौ इति जलस्य मधुर एव रसः शीतल एव स्पर्शः
तिक्तवदवृत्तिमधुरवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं शीतेतरस्पर्शवदवृत्तिशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः
कालिंदीजलादौ नीलिमोपलब्धेरिति चेन्न नीलजनकतावच्छेदिकायाः [illegible] पृथिवीत्वजातेरभावात् जले नीलरूपासं
भवात् कालिंदीजले नीलिमप्रतीतिस्त्वाश्रयोपाधिकी अत एव वियति विक्षेपे धवलिमोपलब्धिः अथ जले माधुर्ये किं मानं न हि रसने
णाकोपि रसस्तत्रानुभूयते न च नारिकेरजलादौ माधुर्यमुपलभ्यत एवेति वाच्यं तस्याश्रयोपाधित्वात् अन्यथा जंबीर[illegible]करवीरा
दाव म्लाद्युपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न हरितक्यादिभक्षणस्य जलरसव्यंजकत्वात् न च हरीतक्यामेव जलोष्मसंयोगा
द्रसांतरोत्पत्तिरिति वाच्यं कल्पनाप्रतीतिः एवं जन्यशीतस्पर्शजनकतावच्छेदकं जलत्वं जन्यजलत्वं वा बोध्यं यत्त्वंदनादौ तु शैत्य
भ्रांतिरेव ४

नागौरवात्॥ पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वात् जले नाम्लादिकं जंबीररसादौ त्वाश्रयोपाधिकी तथा १

वत
ननु जल
स्य शुक्ल
रूपमेवेति
कुतः ५

व

त

वत

न्या०मु० १० ब

10

पलब्धिश्चंदनांतर्वर्त्तिशीततरसलिलस्यैवतेजःसंयोगाज्जलेऽप्यौष्ण्यप्रतीतिरौपाधिकी स्फुटैवतन्नयाकासंभवात् स्नेहस्तत्रैवेति घृतादाव
पितदंतर्वर्त्तिजलस्यैवस्नेहः जलस्यैवस्नेहसमवायिकारणत्वात् तेनजलएवस्नेहइतिमंतव्यं द्रवत्वंतुसांसिद्धिकमुदाहृतं सांसिद्धि
कद्रवत्वत्वंजातिविशेषः प्रत्यक्षसिद्धः तेन नैमित्तिकतावच्छेदकमपि तदेवेतिभावः तैलादावपिजलस्यैवद्रवत्वंस्नेहप्रकर्षेणाचद द्रवत्वं किंन्न
हनानुकूल्यमितिवक्ष्यते नित्यतादिप्राग्वदिति पृथिव्यादिवदित्यर्थः तथाहि जलंद्विविधंनित्यमनित्यंच परमाणुरूपंनित्यं द्व्यणु
कादिकंसर्वमनित्यंअवयवसमवेतंच अनित्यमपित्रिविधं शरीरेंद्रियविषयभेदात् पृथिवीतोयोविशेषस्तमाह किंतुदेहम
योनिजमिति अयोनिजमेवेत्यर्थः जलीयंशरीरमयोनिजंवरुणलोकेप्रसिद्धमिति इंद्रियंरसनमिति जलीयमित्यर्थः तथाहि रसनंजली
यं गंधाद्यव्यंजकत्वेसतिरसव्यंजकत्वात् सक्तुरसाभिव्यंजकोदकवत् रसनसंनिकर्षेव्यभिचारवारणायद्रव्यत्वंदेयं विषयंदर्शयति पं
तु सिंधुहिमादिर्विषयोमतः सिंधुःसमुद्रः हिमंतुषारः आदिपदात्सरित्कासारकरकादिः सर्वोपिग्राह्यः नचहिमकरकयोः
कठिनत्वात्पार्थिवत्वमितिवाच्यं उष्मणाविलीनयोस्तयोर्जलत्वस्यप्रत्यक्षसिद्धत्वात् यद्द्रव्यंयद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपा
दानोपादेयत्वसिद्धेः अदृष्टविशेषेणद्रवत्वतिरोधानात्करकायांकाठिन्यप्रत्ययस्यभ्रांतत्वात् तेजोनिरूपयति स्पर्शउष्ण
स्तेजसस्तुइति उष्णत्वंस्पर्शनिष्ठजातिविशेषःप्रत्यक्षसिद्धः इत्थंच जन्योष्णस्पर्शसमवायिकारणतावच्छेदकंतेजस्त्वजाति
विशेषः तस्यपरमाणुवृत्तित्वंतुजलस्यैवानुसंधेयं नचोष्णस्पर्शवत्त्वंचंद्रकिरणादावव्याप्तमितिवाच्यं तत्राप्युष्णस्पर्शसत्त्वात् राम १०
त्व

सु२

किंतु तदंतः पातिजलस्पर्शेनाभिभवात्तदग्रहः एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः स्यादूपंमुक्ताभास्वरमि
तिवैश्वानरेमरकतकिरणादौ च पार्थिवरूपेणाभिभवाच्छुक्लत्वाग्रहः तद्रूपाग्रहे धर्मिग्रहोपि चाक्षत्वेन स्यादिति चेन्न अमदीपरूपेण अथ
वधर्मिग्रहसंभवात् शंखस्येवपि त्वयीतिमन्ता वन्हेः शुक्लरूपेनाभिभूतं किंतु तदीयं शुक्लत्वमभिभूतमित्यमेनैमित्तिकद्रवत्वति
तिसुवर्णादिरूपे तेजसितत्सत्वात् नचनैमित्तिकद्रवत्वत्वं न लक्षणं दहनादौ व्याप्तेर्घृतादावतिव्याप्तेश्चेति वाच्यं पृथिव्यवृत्तिनै
सांसिद्धिक मित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात् नित्यादिचपूर्ववदिति जलस्येवत्यर्थः तथाहि तद्द्विविधं नित्यमनि ता
त्यं नित्यं परमाणुरूपं तदन्यदनित्यं अवयवसमवेतं च तच्च शरीरेंद्रियविषयभेदात्त्रिविधं शरीरमयोनिजमेवेत्ति तच्च सूर्यलोकादौ प्रसि
द्धं अन्त्ययोर्विशेषस्तमाह इंद्रियंनयनमितिचक्षुस्तेजसं परकीयस्पर्शाद्यव्यंजकत्वे सति परकीयरूपव्यंजकत्वाद्व्यभिचारवारणाय हि
तीयं परकीयेति अथवा प्रभायाः दृष्टांतत्वसंभवाद्दायं परकीयेति न देयं चक्षुः संनिकर्षे व्यभिचारवारणाय द्रव्यत्वं देयं विषयंद
र्शयति वन्हिसुवर्णादि विषयोमतः इति ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न सुवर्णं तैजसमसति प्रतिबंधके ऽत्यंतानलसंयो स
गेप्यनुच्छिद्यमानद्रवत्वात् यन्नैवं तन्नैवं यथा पृथिवी न चाप्रयोजकं पृथिवीद्रवत्वं जलद्रवत्वस्य चाग्निसंयोगनाशत्वात् ननु पी स्य जन्य
तिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न जलमध्यस्थमसीपोदवत्तस्याद्रवत्वात् अपरे तु पीतिमा
श्रयस्यात्यंताग्निसंयोगेपि पूर्वरूपापरावृत्तिदर्शनात् तत्प्रतिबंधकविजातीयद्रवद्रव्यकल्पते तथाहि अग्नियोगो पीति सं
त प्रदीपवत्॥ प्रदीपस्य स्वीयस्पर्शव्यंजकत्वाद्दृष्टांतासिद्धिः य
घि केवलत्वा २ ननु चक्षुषस्तैजसत्वे किं मानमिति चेदुच्यते त इवारणाय प्रभयं परकीयेति घटादेः स्वीयरूपव्यंजकत्वाद्

विजातीय १ द्रव १

त्या०सि

११ मगुरुत्वाश्रयः रूपप्रतिबंधकविजातीयँद्रव्यसंयुक्तः [redacted] अत्यंतानलसंयोगेपिपूर्वरूपविजातीयरूपानधिकरणत्वात् तत्तजलमध्यस्थपीतद्रव्यवत् तस्यरत्त्वीजलमि १

न्नस्पतेजस्त्वमित्यमात् वायुंनिरूपयति अपाकजोऽनुष्णाशीतस्पर्शस्तुपवनेमतः तिर्यग्गमनवानेषज्ञेयः स्पर्शादिलिंग

कइति अनुष्णाशीतस्पर्शस्यपृथिव्यामपिसत्वात् उक्तमपाकजइति अपाकजस्पर्शस्यजलादावपिसत्वादुक्तमनुष्णाशी

तइतितेनवायोविजातीयस्पर्शोदर्शितस्तज्जनकतावच्छेदकंवायुत्वमितिभावः एषः वायुःस्पर्शादिलिंगकः वायुर्हिस्पर्शशब्दधृ

तिकंपैरनुमीयते विजातीयस्पर्शेनविलक्षणशब्देनतृणादीनांधृत्याशाखादीनांकंपेनचवायोरनुमानात् यथाचवायुर्नप्रत्य

क्षस्तथाग्रेवक्ष्यते पूर्ववन्नित्यमनित्यंचक्तमिति वायुर्द्विविधोनित्योनित्यश्च परमाणुरूपोनित्यस्तदन्योऽनित्यः समवेतश्चसोपित्रिविधः अवयव

शरीरेंद्रियविषयभेदात् तत्रशरीरमयोनिजंपिशाचादीनांपरंतुजलीयतेजसवायवीयशरीराणांपार्थिवभागोपष्टंभा [illegible] दुपभोग

क्षमत्वंजलादीनांप्राधान्याज्जलीयत्वादिकत्वमिति अन्योविशेषस्तमाह देहव्यापित्वगिंद्रियमिति शरीरव्यापकंस्पर्शग्राहकंइंद्रि

यंत्वक् तच्चवायवीयंरूपादिषुमध्येस्पर्शस्यैवव्यंजकत्वात् अंगसंगिसलिलशैत्यव्यंजकव्यजनवायुवत् विषयंदर्शयति प्राणादिस्तु

महावायुपर्यंतोविषयोमतइतिप्राणापि पी प्राणोपिवायुश्चतुर्विधस्तस्यचतुर्विधाप्राणादिभिस्तुक्तमाकरे तथापित्रैविध्यमुक्तं प्राणएव

स्वैकएवहृदादिनानास्थानवशात् मुखनिर्गमनादिनानाक्रियावशेनत् नानासंज्ञांलभतइति आकाशंनिरूपयति आकाशस्य एम

११

स्प भेदाच्च संक्षेपादेव २

तुविज्ञेयः शब्दो वैशेषिको गुण इति आकाशकालदिशामेकव्यक्तित्वादाकाशत्वादिकं न जातिः "आकाशत्वं शब्दाश्रयत्वं वैशेषि
क इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय एतेन प्रमाणा[illegible]मपि दर्शितं तथाहि शब्दो गुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्य
जातिमत्वात् स्पर्शवत् शब्दो द्रव्यसमवेतः गुणत्वा[illegible]त् संयोगवत् इत्यनुमानेन शब्दस्य द्रव्यसमवेतत्वसिद्धेः शब्दो न स्पर्श
वद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् पाकजरूपादौ व्यभिचारवा क
गुण रणाय सत्यन्तं पटरूपादौ व्यभिचारवारणाय कारणपूर्वकेति जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति न दिक्कालमनोगुण शब्दो
:विशेषगुणत्वात् गंधवत् नात्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वात् रूपवत् इत्थं च शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिध्यतीति
न च वायववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यं अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभा
वात् तत्र शरीरस्य विषयस्य चाभावात् इन्द्रियं दर्शयति इन्द्रियं तु भवेच्छ्रोत्रमिति नन्वाकाशो लाघवादेकः सिद्धः श्रोत्रं पुरुषभे
च दाद्भिन्नं कथमाकाशं स्यादत आह एकः सन्नप्युपाधितः इति आकाश एकः सन्नप्युपाधेः कर्णशष्कुली भेदाद्भिन्नः श्रोत्रा
त्मको भवतीत्यर्थः कालं निरूपयति जन्यानां जनकः काल इति तत्र प्रमाणं दर्शयितुमाह जगतामाश्रयो मत इति इदानीं घटः स्यादि ३
प्रतीतिः सूर्यपरिस्पंदादिकं यदि विषयीकरोति तदा सूर्यपरिस्पंदादिना घटादेः संबंधो वाच्यः स च संयोगादिर्न संभवतीति काल एव सं
मेव बंधघटकः कल्प्य तदित्थं च तस्याश्रयत्वं संभवेत् प्रमाणान्तरं दर्शयति परापरत्वधीहेतुरिति परत्वापरत्वबु[illegible]द्धेरसाधारणनिमित्तं

इदानीं घटः [illegible] इति विशिष्टबुद्धिः परंपरासंबंधविषया साक्षात्संबंधाभावे सति विशिष्टबुद्धित्वात् लोहितः स्फटिक इति विशिष्टबुद्धिवत् ॥३॥

=वक्रतरत्वक्रियाविशिष्टमिदं इति बुद्धिः विशेषणविशेष्यपरंपरासंबंधघटकसापेक्षा साक्षात्संबंधाभावे सति विशिष्टबुद्धित्वात् लोहितः स्फटिक इति विशिष्टबुद्धिवत् =१
१नन्वेकस्य कालस्य सिद्धौ क्षणादिनमासवर्षादिसमयभेदो न स्यादत आह क्षणादिरिति । क्षणादिस्स्यादुपाधितः ।

मा०सि०
१२

कालएव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः कल्प्यत इति भावः कालस्यैकोपि उपाधिभेदात् क्षणादिव्य
वहारविषयः उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म पूर्वसंयोगावच्छिन्नविभागो वा पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रा
12 गा गभावो वा उत्तरसंयोगावच्छिन्नं कर्म वा न चोत्तरसंयोगानंतरं क्षणव्यवहारो न स्यादिति वाच्यं कर्मांतरसत्वादिति महाप्रलये क्षणादि पे
व्यवहारो यद्यस्ति तदा नाशध्वंसैर्वोपपादनीय इति दिशं निरूपयति दूरांतिकादिधीहेतुरेका नित्या दिगुच्यते इति दूरत्वमं
म तिकत्वं च दैशिकं परत्वं परत्वं च बोध्यं तद्धेतुः साधारणं बीजं दिगेव दैशिकपरत्वासमवायिकारणसंयोगाश्रयतया दिक् सिध्यती परत्वयोर
तिभावः नन्वेकैव दिक् यदि तदा प्राचीप्रतीच्यादिव्यवहारः कथमुत्पद्यतामत आह उपाधिभेदादेकापि प्राच्यादिमपदेशभागि
ति प पुरुषस्योदयगिरिसन्निहिता या दिक् पुरुषस्य सा प्राची उदयगिरिव्यवहिता च प्रतीची एवं तत्पुरुषीयसुमेरुसंनिहि
तादिगुदीचीतद्व्यवहितात्ववाची सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति नियमात् आत्मानं निरूपयति आत्मेंद्रियाद्यधिष्ठाते
सु ति आत्मत्वजातिः सुखादिसमवायिकारणतावच्छेदकतया सिध्यति ईश्वरेपि सा जातिरस्त्येव अदृष्टादिरूपकारणाभावा दुःखा
च्चेन सुखदुःखाद्युत्पत्तिः नित्यसुखस्वरूपयोग्यत्वे फलावश्यंभावद्वयस्याप्रयोजकत्वात् अपरे तु ईश्वरे जातिर्नास्त्येव प्रमाणाभा सा
न वात् न च दशमद्रव्यत्वापत्तिः ज्ञानवत्वेन विभजनादित्याहुः अधिष्ठाता इंद्रियाणां शरीरस्य च परंपरया चेतनसंपादकः यद्यप्यात्म
महं जानेहं सुखी त्यादिप्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नत्वं एवं तत्त्वतीति गोचरइति तम
प्र १२

अतिरिक्तः कर्त्ता कल्प्यते ननु शरीरस्यैव कर्तृत्वमस्तु अत आह शरीरस्य न चैतन्यं ॥ दी

तत् ॥ ॥ मृतेषु व्यभिचारतः २ दि नां

कुठारादीनां प्रतिपादयितुं न शक्यते इत्यतः प्रमाणं दर्शयति करणं हि सकर्तृकमिति वा स्यान्नांछि करणं कर्त्रीरमंतरेण फलानुपधानं दृष्टं एवं च

क्षुरादीनां ज्ञानकरणानां फलोपधानं कर्त्तारमंतरेण नोपपद्यत इति ननु चैतन्यं ज्ञानादिकं मे [illegible] व मुक्तात्मनां त्वन्मतेऽपि

मृतशरीराणामपि तदभावे का क्षतिः प्राणाभावे न ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे

प स्मरणानुपपत्तेः शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्का श

श र उत्पद्यत इति वाच्यं अनंतसंस्कारकल्पनायां गौरवात् एवं शरीरस्य चैतन्ये बालस्य स्तन[illegible]पानादौ आद्या प्रवृत्तिर्न स्यात् इष्ट

साधनता ज्ञानस्य तद्धेतुत्वात् तदानीमिष्टसाधनत्वानुभावकाभावात् मन्मते तु जन्मांतरानुभूतेष्टसाधनत्वस्य तदा स्मरणादे नी

व प्रवृत्तिः न च जन्मांतरानुभूतमन्यदपि स्मर्यतेति वाच्यं उद्बोधकाभावात् अत्र त्वनायत्या दृष्टमेवोद्बोधकं कल्प्यते इत्थं च संसार जीवना

स्यानादितया आत्मनोऽनादित्वसिद्धौ वनादिभावस्य नाशासंभवान्नित्यत्वं संभवतीति बोध्यं ननु च चक्षुरादीनां ज्ञानादौ करणत्वं

कर्तृत्वं चास्तु विरोधे साधकाभावात् अत आह तथात्वं चेदिंद्रियाणामुपघाते कथं स्मृतिरिति चैतन्यमित्यर्थः उपघाते नाशे त घात्वं

सति अयोग्य चक्षुरादीनामेव कथमिति पूर्वं चक्षुषा साक्षात्कृतानां च चक्षुरभावे स्मरणं न स्यात् अनुभवितुरभावात् अन्येना

नुभूतस्यान्येन स्मरणायोगात् अनुभवस्मरणयोः समानाधिकरण्येन कार्यकारणभावादिति भावः ननु च चक्षुरादीनां चैतन्यं मा

स्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह मनोऽपि न तथेति न तथा न चेतनमिति भावः ~~ननु चक्षुरादीनां चैतन्यमस्तु मनसस्तु~~ति

मि

तस्यैवान्तःसंस्थात्मनः [illegible] ज्ञानाद्यनश्यत्ततश्च भवेत् मनसोऽणुत्वात् प्रत्यक्षे च महत्वस्य हेतुत्वान्मनसि ज्ञानसुखादिसत्वे तत्प्रत्यक्षस्यानु
पपत्तेरित्यर्थः यथा मनसोऽणुत्वं तथाऽग्रे वक्ष्यते ननु वस्तु विज्ञानमेवात्मा तस्य स्वतःप्रकाशरूपत्वाच्चेतनत्वं ज्ञानसुखादिकं तस्यै
पूर्वविज्ञान वाकारविशेषः तस्यापि भावत्वादेव क्षणिकत्वं पूर्वस्मात्तु उत्तरोत्तरविज्ञानहेतुत्वात् सुषुप्तावप्यालयविज्ञानधारानिराबाधैव मृगमदवास
वासितं नयोर्वसनवद्वपूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने [redacted] संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न
13 तस्य जगद्विषयत्वे सर्वज्ञतापत्तेर्यत्किंचिद्विषयत्वे विनिगमकाभावः सुषुप्तावपि विषयावभासप्रसंगश्च तदानीं निराकाराचित्संतति
इति रनुवृत्तेरिति चेन्न तस्याः प्रकाशत्वे मानाभावात् अन्यथा घटादीनामपि ज्ञानत्वापत्तिः न चेष्टापत्तिर्विज्ञानव्यतिरिक्तवस्तुनोऽभा
वादिति वाच्यं घटादेरनुभूयमानस्यापलपितुमशक्यत्वात् आकारविशेष एवायं विज्ञानस्येति चेत् किमयमाकारोऽतिरिच्यते विज्ञा
नात् तर्हि समायातं विज्ञानव्यतिरिक्तेन नातिरिच्यते चेत् तर्हि समूहालंबने नीलाकारोऽपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात्
अयोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशादितरथा विरोधावधारणासंबहु
रूपपन्नत्वात् न वा वासनासंक्रमः संभवति मातृपुत्रयोरपि वासनासंक्रमप्रसंगात् न चोपादानोपादेयभावो नियामक इति वा
च्यं वासनायाः संक्रमासंभवात् उत्तरस्मिन्नुत्पत्तिरेव सं[illegible]क्रम इति चेन्न तदुत्पादकाभावात् चितामेव तदुत्पाद
संक्रान्त। कत्वे तदानंत्यप्रसंगः क्षणिकविज्ञाने ष्वतिशयविशेषः कल्प्य इति चेन्न मानाभावात् कल्पनागौरवाच्च एतेन क्षणिक रण १३

शरीरेष्वेव चैतन्यमपि प्रसक्तं गौरवादतिशयेमानाभावाच्च बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वा
कल्पनात् अस्तु तर्हि क्षणिकविज्ञानं गौरवान्नित्यं विज्ञानमेवात्मा अविनाशी वा अरेऽयमात्मा सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रु
तेश्चैतन्नतस्य सवि षय संभवस्य दर्शितत्वान्निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयत्वस्याप्यनुभवात् अतो ज्ञा न
नभिन्नो नित्य आत्मेति सिद्धं सत्यं विज्ञानमिति ब्रह्मपरं जीवे पुनोपयुज्यते ज्ञानानंतसुखित्वा ज्ञा
दिभिर्जीवानां भेदसिद्धेः सुतरामीश्वरभेदोऽन्यथा बंधमोक्षानुपपत्तेः योपीश्वराभेदबोधको वेदः सोपि तदभेदेन त
दीयत्वं प्रतिपादयन्नुस्तौति अभेदभावनयैव यतितव्यमिति अतएव सर्व एवात्मानः समर्पिता इति श्रूयते मोक्षद भावः
शायामज्ञाननिवृत्तावभेदो जायत इत्यपि न भेदस्य नित्यत्वेन नाशायोगात् भेदनाशेपि व्यक्तिद्वयं स्थास्यत्येव न च द्वित्वम न
पि नश्यतीति वाच्यं तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेपि सत्यस्वरूपं तदितिवत् द्वित्वाभावेपि द्विरूपात्मकौ ताविति सुवचत्वात् मिथ्या व्यत्ति
त्वाभावोधिकरणात्मकस्तत्र सत्यत्वमिति चेत् एकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमित्यप्युच्यतां प्रत्येकमेकत्वेपि पृथिवी
जलयोर्न गंध इतिवदुभयं नैकमित्यस्य सर्व जनसिद्धत्वात् योपि त्विदानीमभेदप्रतिपादक आगमः सोपि निर्दुःखत्वादि
नासाम्यं प्रतिपादयति संपदाधिके पुरोहितोयं राजा संवृत्त इतिवत् अतएव निरंजनः परमं साम्यमुपैतीति श्रूयते ईश्वरो
पि न ज्ञानस्वरूपात्मा किंतु ज्ञानाद्याश्रयो नित्यं विज्ञा न मानं ब्रह्मेत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः सर्वज्ञ इत्याद्यनु

दिति

परिणामः सैवमहत्तत्वमंतः करणमित्युच्यते॥ ततस्तत्सत्ताभ्यां पुरुषस्य संसारापवर्गौ॥ तस्माएवइंद्रिय ४

न्या०सि १४ रोधात् आनंदमित्यस्यापि आनंदवदित्यर्थः आनंदोपि दुःखाभावे नोपचर्यते भारापगमे सुखी संवृत्तोहमितिवत् अस्तुवास्मिन्नानंदो त
नत्वसावानंदोऽसुखमितिश्रुतेः नविद्यते सुखं यस्येति कुतोनर्थ इतिचेन्न क्लिष्टकल्पनापत्तेः प्रकरणविरोधाच्च आनंदमित्यत्रमत्व
च र्थीयप्रत्ययविरोधाच्चेतिसंक्षेपः एतेनप्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किंतुचेतनः कार्यकारणयोरभेदात्कार्यनाशे स
त तिकार्यरूपतयाप्रनाशो नस्यादित्यकारणत्वं तस्य बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्यातत्कल्पनं बुद्धिश्चप्रकृतेःपारिणामिकपा
15 परिणतिर्ज्ञानरूपाघटादिनासंबंधः पुरुषेकर्तृत्वाभिमानो बुद्धौचैतन्याभिमानश्चाभेदाग्रहात् ममेदंकर्त्तव्यमितिमदंशःपुरुषोप
रागोबुद्धेः स्वच्छतयाचेतनप्रतिबिंबादतात्त्विकोदर्पणस्येवमुखोपरागः इदमितिविषयोपरागइंद्रियप्रणालिकयापरिणा
तिभेदस्तात्त्विकः निश्वासाभिहतदर्पणस्येवमलिनिम्ना कर्तव्यमितिव्यापारावेशः तेनांशत्रयवतीबुद्धिः तत्परिणामेन ज्ञानेन पुरुषस्या
तात्त्विकः संबंधः दर्पणमलिनिम्नेवमुखस्योपलब्धिरुच्यते ज्ञानवत्सुखेच्छाद्वेषप्रयत्नधर्माधर्मा अपिबुद्धेरेवकृतिसामानाधिकरण्यप खदुः [redacted]
नप्रतीतेः नचबुद्धिश्चेतनापरिणामित्वात् इतिमतमपास्तं कृसदृष्टभोगानामिव चैतन्यस्यापिसामानाधिकरण्यप्रतीतेः तदभिन्ने
मानाभावाच्च चेतनोहंकरोमीतिप्रतीतिः चैतन्यांशे भ्रमइतिचेत् कृत्यंशेपिकिंनेष्यते अमथाबुद्धेर्नित्यत्वेमो
क्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः अचेतनायाःप्रकृतेःकार्यत्वाद्बुद्धेरचेतनत्वं कार्यकारणयोस्तादात्म्यादितिचेन्न असि
द्धेः कर्तुर्जन्यत्वे मानाभावात् वीतरागजन्मादर्शनादनादित्वं अनादे नोर्णसंभावान्नित्यत्वं तत् किंप्रकृत्यादिक एम १४

त्मनेनैनव प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यते इत्यनेन विरोध इति वाच्यं प्रकृते
रदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः कर्ताहमेवेत्यस्य तदर्थत्वात् तत्रैवं सति कर्तारमात्मानं केवलं तु पश्यत्यादि वदता भगवता
प्रकटीकृतोयमुपरिष्टादाशय इति संक्षेपः धर्माधर्माश्रय इति आत्मेत्यनुषज्यते शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणा
देहान्तरे भोगानुपपत्तेः अध्यक्षो विशेषगुणयोगत इति योग्यविशेषगुणसंबंधेनात्मनः प्रत्यक्षं भवति न त्वन्यथा अहं जानेऽ
हं करोमीत्यादिप्रतीतेः केवलात्मविषयकप्रतीतेरननुभवात् प्रवृत्त्याद्यनुमेयोयमिति अयमात्मा परदेहादौ प्रवृत्त्यादिनानु
मीयते प्रवृत्तिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वाच्चेष्टायाश्च प्रयत्नसाध्यत्वात् चेष्टया प्रयत्नवानात्मानु
मीयत इति भावः अत्र दृष्टान्तमाह रथगत्यैव सारथिरिति यद्यपि रथकर्म चेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथानुमीयते
तथा चेष्टात्मकेन कर्मणा परात्मापीति भावः अहंकारस्याश्रयोयमिति अहंकारोऽहमिति प्रत्ययस्तस्याश्रयो विषय आत्मा न श
रीरादिरिति मनोमात्रस्य गोचर इति मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्च समर्थः रूपाद्यभावेनेन्द्रियान्तरा
म योग्यत्वात् विभुरिति विभुत्वं परममहत्त्वं तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तं बुद्ध्यादिगुणवानिति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना विमाराणवत्वं
दृष्टा गुणाः पूर्वमुक्ता वे[illegible]दितव्याः अत्रैव प्रसंगात्कतिपयं बुद्धेः प्रपंचं दर्शयति बुद्धिस्तु द्विविधा मतेति द्वैवि

५

तत्रा =

मव्यपदेश्यमव्यभिचारिव्यवसायात्मकंप्रत्यक्ष ४ दृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्यस्मरणे अनुभवस्यकरणत्वान्नतिव्याप्तिः॥ इदंतल्लक्षण ४

मा०सि ९५

15

धं अनुसादयति अनुभूतिः स्मृतिश्चस्यादनुभूतिश्चतुर्विधा प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजेइति एतासांचतसृणांकरणानिचत्वारि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीतिसूत्रोक्तानिवेदितव्यानि तत्रेंद्रियजन्यंज्ञानंप्रत्यक्षं यद्यपिमनोरूपेंद्रियजन्यं सर्वमेवज्ञानं तथापिइंद्रियत्वेनरूपेणेंद्रियाणां यत्रज्ञानेकरणत्वं तत्प्रत्यक्षमितिविवक्षितं ईश्वरप्रत्यक्षंतुन लक्ष्यं इंद्रियार्थसन्निकर्षोत्पन्नंमितिसूत्रेतथैवोक्तत्वात् अथवाज्ञानाकरणकंज्ञानंप्रत्यक्षं अनुमितौव्याप्तिज्ञानस्योपमितौसादृश्यज्ञानस्यसाधारणं परामर्शजन्यंज्ञानमनुमितिः यद्यपिपरामर्शप्रत्यक्षादिकंपरामर्शजन्यं तथापिपरामर्शजन्यंहेत्वविषयकंज्ञानमनुमितिः नच काचाचित्कहेतुविषयकानुमितौ अव्याप्तिरितिवाच्यं तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात् अथवाव्याप्तिज्ञानकरणकंज्ञानमनुमितिः एवंसादृश्यज्ञानकरणकंज्ञानमुपमितिः पदज्ञानकरणकंज्ञानंशाब्दबोधः वस्तुतोयत्किंचिदनुमितिव्यक्तिमादायतद्व्यक्तिवृत्तिमत्त्वस्यावृत्तिजातिमत्त्वं अनुमितित्वं एवंयत्किंचित् प्रत्यक्षादिकमादायतद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वंप्रत्यक्षत्वादिकं

जन्य निर्वाच्यमिति प्रत्यक्षं[illegible]विभजते घ्राणजादिप्रभेदेनप्रत्यक्षंषड्विधंमतंइति घ्राणजंरासनंचाक्षुषंस्पार्शनंश्रोत्रंमानसमितिषड्विधंप्रत्यक्षं नचेश्वरप्रत्यक्षस्याविभजनान्यूनत्वं जन्यप्रत्यक्षस्यैवनिरूपणीयत्वात् उक्तसूत्रानुसारात् घ्राणस्यगोचरोगंधइति गोचरोग्राह्यइत्यर्थः गंधत्वादिरपिस्यात्इति आदिपदात्सुरभित्वादिपरिग्रहः गंधस्यप्रत्यक्षत्वात्तद्वृत्तिजातिरपिप्रत्यक्षा गंधाश्रयग्रहणेनुघ्राणस्यासामर्थ्यमितिबोध्यं तथारसोरसज्ञापास्तथाशब्दोपिचश्रुतेरिति रसत्वादिसहितइत्यर्थः तथाशब्दत्वादि एव

१५

रूपमत्रापिकारणं द्रव्याध्यक्षइति

सहितः गंधोरसश्चो(द्)भूतो वोध्यः उद्भूतरूपं न पनस्य गोचरोद्रव्याणितद्वंतिपृथक्त्वसंख्ये विभागसंयोगपरापरत्वं स्नेहोद्रवत्वं परिमा
णायुक्तं क्रियाजातियोग्यवृत्तिः समवायश्चतादृशइति ग्रीष्मोष्मादाव नुद्भूत रूपमिति न तत्प्रत्यक्षं तद्वंत्युद्भूत रूपवंति
पृथक्त्वादिकमपि योग्यव्यक्तिवृत्ति वोध्यं तादृशो योग्यव्यक्तिवृत्तिः चक्षुर्योग्यत्वमेव कथं तदाह गंधजातिचक्षुः संवंधा
दालोकोद्भूतरूपयोरिति आलोकसंयोगउद्भूतरूपं च वाक्षुषप्रत्यक्षे कारणं तत्र द्रव्यचाक्षुषं प्रतितयोः समवायसंवंधेन
कारणत्वं द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसंवंधेन द्रव्यसमवेतसमवेतस्वरूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतस
मवायसंवंधेनेति उद्भूतस्पर्शवद्द्रव्यं गोचरः सोपि च त्वचइति उद्भूतस्पर्शवद्द्रव्यं त्वचो गोचरः सोपि उद्भूतस्पर्शोपि स्पर्शत्वा
दिसहितः रूपास्मच्च(क्षु)षोयोग्यं रूपमत्रापिकारणं द्रव्याध्यक्षइति रूपभिन्नंरूपत्वादिभिन्नं च यच्चक्षुषोयोग्यं तत्त्वगिंद्रियस्या
पि ग्राह्यं तथा च पृथ क्त्वसंख्यादयोपि चक्षुर्ग्राह्या गुणा उक्ताः एवं क्रिया जातैयोग्यवृत्तयस्त्वचो ग्राह्या इति अत्रापि त्वगिं
द्रियजन्ये द्रव्यप्रत्यक्षेपि रूपं कारणं तथा च वहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणं नवीनास्तु वहिर्द्रव्यप्रत्यक्षे न रूपं कारणं
किं तु चाक्षुषप्रत्यक्षे रूपं कारणमिति विचिन्तकिंचित् आत्माद्व(त्ति)शब्दभिन्नविशेषगुणावत्त्वं वा प्रयोजकमस्तु
रूपस्य कारणत्वे लाघवमिति चेन्न वायोस्त्वगिंद्रियेण ग्रहणप्रसंगात् इष्टापत्तिरिति चेत् स्पर्श एव लाघवात् कारणमस्तु प्र
भाया अप्रत्यक्षत्वे त्विष्टापत्तिरेव किं न स्यात् तस्मात्प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्यक्षसत्त्वाद्वायोरपि प्रत्यक्षं भ

त्वे १ स्पार्शनप्रत्यक्षे च स्पर्शः कारणं अन्वयव्यतिरेकात् वहिरिं॥
द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं न

तत्पर्थः

पं ५ द्र
रिंद्रियजन्य

उद्भूत

पि
प्रमाणाभा
वात्

मा०सि०
१६
16

वत्सेव वहिरिंद्रियप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रत्यक्षे व्यतिरेकत्वं गतः एत एव क्वचिद्द्वित्वादिकमपि क्वचित्संख्यापरिमा

णाद्यग्रहो दोषादित्याहुः त्वचो योगो मनसा ज्ञानकारणमिति त्वङ्मनः संयोगो ज्ञानसामान्ये कारणमित्यर्थः किं तत्र प्रमाणं

सुषुप्तिकाले त्वचं संस्पृश्य पुरीतति वर्तमानेन मनसा ज्ञानाजननमिति ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूप

स्मरणरूपं वानाद्यः अनुभवसामग्र्यभावात् न द्वितीयः प्रसक्ते च चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात्तदभावादेव न चाक्षुषादि

वा प्रसक्तं ज्ञानादेरभावादेव न मोप्रसक्तं [redacted] न्तशाब्दबोधः इत्यनुभवसामग्र्यभावान्नानुभवः उद्बोधकाभावाच्च न स्म नस

रणमेवं सुषुप्तिप्राक्काले सन्निच्छादिमत्के स्तसंवंधेनात्मनः प्रसक्तप्रसंगात् तदतीन्द्रियत्वे मानाभावात् सुषुप्ति प्रा

क्काले निर्विकल्पकमेव वृत्तिपमेन जायते इत्यत्रापि मानाभावात् अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासन

चाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात् विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् परस्पर प्रतिवंधादेकमपि

वा न स्यादिति अत्र केचित्पूर्वोक्तयुक्त्या त्वङ्मनोयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रति वंधकत्वमनुभवा

नुरोधात्कल्पते इति अन्ये तु सुषुप्त्यनुरोधेन चर्ममनःसंयोगस्य ज्ञानमात्रे हेतुत्वं कल्प्यं चाक्षुषादिप्रत्यक्षकाले त्व

ङ्मनःसंयोगाभावान्न त्वाचप्रत्यक्षमिति मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिरिति मनोजन्यप्रत्यक्षविषयं सुख

र्थः मतिर्ज्ञानं कृतिः प्रयत्नः एवं सुखत्वादिकमपि मनोग्राह्यमेवमात्मापि मनोग्राह्यः किंतु मनोमात्रस्य गोचर इत्यनेन पूर्वस्य एष १६

ज्ञानाद्यभावे चात्मनोपि न प्रत्यक्षमिति॥ व्याप्तिज्ञानाभावादेव नानुमितिः सादृश्यज्ञानाभावान्नोपमितिः पदज्ञानाभावा

टत्वादिकं न प्रकारस्तेन घटत्वादि विशिष्टवैशिष्ट्यभानं ज्ञानेन संभवति घटत्वाद्यप्रकारकं च घटत्वादि
विशिष्ट सं

घा१ क्तत्वादत्वेनोक्तः ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यत इति चक्षुःसंयोगानंतरं घट इत्याकारकं घटत्वादिविशिष्टं ज्ञानं न संभव विषयकं १
ति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात् विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्या
त्स व [redacted] नवगाह्येव ज्ञानं जायते तदेव निर्विकल्पकं तच्च न प्रत्यक्षं तथा हि विषयानवगाहि ज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीति प्र वैशिष्ट्या द्र
सपात् तत्रात्मनि ज्ञानप्रकारीभूय भासते ज्ञाने घटस्तत्र घटत्वं प्रकारोपः स एव विशेषणमित्युच्यते विशेषणेपि विशेषणं तद्वि
शेषणतावच्छेदकमित्युच्यते विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यावगाहिज्ञाने कारणं निर्विकल्पके च घट
त्वादिविशिष्टज्ञानं न संभवति जातीति रिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमात् महत्त्वं षड्विधे हेतुरिति द्रव्यप्रत्यक्षे
वं महत्त्वं समवायसंबंधेन कारणं द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेतानां गु
णत्वकर्म[redacted]त्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेन कारणमिति इन्द्रियं यमिति अत्रापि षड्विध इत्यनुषज्य कारणमत ४
तें [redacted] किंतु शब्देतरोद्भूत विशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं आत्मादिवारणाय सत्यंतं उद्भूतवि स
शेषगुणस्य श्रोत्रे सत्वाच्छब्देतरेति विशेषगुणेरूपादेश्चक्षुरुपिसत्वादुद्भूतेति उद्भूतत्वं न जातिः शुक्लत्वादिना संकरप्र रादाव ३
पि । स्य संगात् न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यं उद्भूतरूपत्वादिना चाक्षुषादौ जनकतानुपपत्तेः किंतु शुक्लत्वादि
व्याप्यमनुद्भूतत्वं नाना तदभावकूटश्चोद्भूतत्वं तच्च संयोगादावपि तथा च शब्देतरोद्भूतगुणः संयोगादिश्च स्फुरादौ अ वपि
अस्ति

इन्द्रियत्वं तु न जातिः पृथिवीत्वादिना संकरात् ४

मा॰ सि॰
१८
17

स्यतो विशेषेति कालादिकारणापविशेष्यदलं इंद्रियावयवविषयसंयोगस्यापिप्राचांमते प्रत्यक्षजनकत्वादिंद्रियावयवकारणा पव
पकालादौ रूपाभावप्रसक्तेःसंनिकर्षघटकतयाकारणीभूतचक्षुःसंयोगाश्रयस्यकालादेर्वीकारणं मनःपदं ज्ञानकारणा पवा
नित्यपितद्वारणायकरणमतमिति असाधारणंकारणंकरणंअसाधारणत्वंव्यापारवत्त्वं विषयेंद्रियसंबंधोव्यापारः सो
पिषड्विधः इति व्यापारः संनिकर्षः सषड्विधः संनिकर्षउदाहरणद्वारादर्शयति द्रव्यग्रहस्तुसंयोगात्संयुक्तसमवा
यतः द्रव्येषुसमवेतानांतथातत्समवायतः तत्रापिसमवेतानांशब्दस्यसमवायतः तद्वृत्तीनांसमवेतसमवायेनतुग्रहः वि
शेषणतयातद्वदभावानांग्रहोभवेत् इति प्रत्यक्षंसमवायस्यविशेषणतयाभवेदिति द्रव्यप्रत्यक्षमिंद्रियसंयोगजमं द्र
व्यसमवेतप्रत्यक्षमिंद्रियसंयुक्तसमवायजमंएवमग्रेपिवस्तुतस्तुद्रव्यचाक्षुषंप्रतिचक्षुःसंयोगःकारणंद्रव्यसमवे
तचाक्षुषंप्रतिचक्षुःसंयुक्तसमवायः द्रव्यसमवेतसमवेतचाक्षुषंप्र [redacted] तिचक्षुःसंयुक्तसमवेतसमवायःरा
वममत्रापिविशिष्यैवकार्यकारणभावः परंतुपृथिवीपरमाणुनीलेनीलत्वंपृथिवीपरमाणौपृथिवीत्वंचचक्षुषाक
च थंनगृह्यते तत्रपरंपरयोद्भूतरूपसंबंधस्यमहत्वसंबंधस्यविद्यमानत्वात् तथाहिनीलत्वंजातिरेकैवघटनीलेपरमाणुनीलेच
वर्त्तते तथाचमहत्वावच्छिन्नचक्षुःसंयुक्तसमवायस्यद्रव्यसमवेतचाक्षुषेतादृशचक्षुःसंयुक्तसमवेतसमवायस्यद्रव्य
[redacted] समवेतसमवेतचाक्षुषेकारणत्वंवाच्यं इत्थंचपरमाणुनीलादौतन्नीलत्वादिग्रहः परमाणुचक्षुःसंयोगस्यम एण
महत्संबंधो घटनीलमादायवर्त्तते रूपसंबंधस्तुप्रमादायैववर्त्तते एवं पृथिवीत्वेपि घटादिकमादायैवसंबंधोबोध्यः एवं वायोतद्वी १८
पस्पर्शादौचसत्तायाःचाक्षुषप्रत्यक्षंस्यात् तस्मादुद्भूतरूपावच्छिन्नेत्यादि २ महत्

हत्वावच्छिन्नत्वाभावात् एवं [illegible] वा यादौ न सत्तादिचाक्षुषं तत्र चक्षुः संयोगस्य रूपावच्छिन्नत्वाभावात् एवं यत्र घ त्वा
टस्य पृष्ठावच्छेदेनालोकसंयोगश्चक्षुः संयोगस्तु अग्रावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुः संयोगवि
शेषणं देयं एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणं द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः द्रव्यसमवेतस
मवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः अत्रापि महत्वावच्छिन्नत्वं उद्भूतस्पर्शावच्छिन्नत्वं [illegible] चक्षुर्वदेव बोध्यं एवं
गंधप्रत्यक्षे घ्राणसंयुक्तसमवायः रसप्रत्यक्षे रसनसंयुक्तसमवायः गंधसमवेतस्य घ्राणजप्रत्यक्षे घ्राणसंयुक्तसमवेतस
न [illegible] मवा[illegible] यः रससमवेतस्य रासनप्रत्यक्षे रसनसंयुक्तसमवेतसमवायः कारणं शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः श ते
ब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः अत्र सर्वत्र प्रत्यक्षं लौकिकं बोध्यं वक्ष्यमाणमलौकिकं प्रत्यक्षं
इंद्रियसंयोगादिकं विनापि भवति एवमात्मनः प्रत्यक्षे मनःसंयोगः आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः [illegible]
~~समवेतसमवेतमानसप्रत्यक्षे संयुक्तसमवेतसमवायः~~ कारणं अभावप्रत्यक्षे समवायप्रत्यक्षे च इंद्रियसंबद्धविशेषणता
ताहेतुः वैशेषिकमते तु समवायो न प्रत्यक्षः अत्र यद्यपि विशेषणता नानाविधा तथाहि भूतलादौ घटाभावः संयुक्त ~~[illegible]~~
॥ विशेषणतया गृह्यते संख्यादौ च रूपाभावः संयुक्तसमवेतविशेषणतया संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतविशे समवेत
षणतया [illegible] शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया एवं
कत्वादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतसमवेतविशेषणतया १

प्रत्यक्षं समवायस्यापि विशेषणतया भवेत्

विशेषणा । व

न्या० सि० एवं कत्वावच्छिन्नाभावे रूपत्वाभावादिकं विशेषणतया घटत्वाभावः एवं घटाभावादौ घटाद्यभावः संयुक्तविशेषणविशेष
१८ णतया एवमन्यदप्यूह्यं तथापि विशेषणतात्वेनैकैव सा गण्यते अन्यथा षोढासंनिकर्षः इति प्राचां प्रवादो व्याहन्येतेति य
18 दि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यतैर्दृति अभावप्रत्यक्षे योग्यानुपलब्धिः कारणं तथाहि भूतलादौ घटादिज्ञाने जाते घटाभा
वादिकं न ज्ञायते तेनाभावोपलंभे प्रतियोग्युपलंभाभावः कारणं तत्र योग्यताप्यपेक्षिता सा च प्रतियोगि सत्वप्रसंजनप्रस
ता० यो ञ्जितप्रतियोगिकत्वरूपा दर्थश्च प्रतियोगिनो घटादेः सत्वप्रसक्त्या प्रसंजित उपलंभरूपः प्रतियोगी यस्य स उपलंभाभावो ऽभावप्र भा
त त्यक्षे हेतुः तथाहि यत्रालोकसंयोगादिकं वर्तते तत्र यदि घटः स्यात्तर्हि उपलभ्येतेत्यापादयितुं शक्यते तत्र घटाभावादिप्रस
न क्षं भवति अंधकारे तु नापादयितुं शक्यते तेन घटाभावादेरंधकारे चाक्षुषं प्रत्यक्षं स्पार्शप्रत्यक्षं तु भवत्येव आलोकसंयो न
गं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात् गुरुत्वादिकं यदयोग्यं तदभावस्तु न प्रत्यक्षः तत्र गुरुत्वादिप्रत्यक्षस्याप नयोग्यः । प०
बुद्धत दयितुमशक्यत्वाद्रूपाद्रूपाभावः घ्राणेन सौरभाभावः गुडे तिक्ताभावः वन्हावनुष्णाभावः श्रोत्रेण शब्दाभावः आत्मनि
सुखाद्यभावः एवमादयस्तत्तदिंद्रियैर्गृह्यंते तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात् संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्य
ता अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यतापेक्षा अतः स्तंभादौ पिशाचादिभेदोपि चक्षुषा गृह्यते एवं प्रत्यक्षं लौकिका लौकिक
भेदेन द्विविधं तत्र प्रत्यक्षे षोढा सन्निकर्षा वर्णितः अलौकिकसन्निकर्षान्वदति अलौकिकस्तु व्यापारस्त्रिविधः परिकी एम
लौकिक १८

त्तिः सामान्यलक्षणो ज्ञानलक्षणो योगजस्त्रिधेति व्यापारं संनिकर्षः सामान्यलक्षणा यस्येत्यर्थः तत्र लक्षणपदेन यदि स्वरूपमु
च्यते तदा सामान्यस्वरूपं प्रत्यासत्तिरित्यर्थो लभ्यते तच्चेंद्रियसंबद्धविशेष्यकज्ञाने प्रकारीभूतं बोध्यं तथाहि यत्रेंद्रियसंयु
क्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं जातं तत्र ज्ञाने धूमत्वं प्रकारः तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलधू
पत्र मविषयकं ज्ञानं जायते अत्र यदिंद्रियसंबद्धमित्येवोच्यते तदा धूलिपटलेषु भ्रममानंतरं सकलधूमविषयकं ज्ञानं न स्या इति ज्ञानं तत्र तेन सन्निकर्षेण
त् तत्र धूमत्वेन सहेंद्रियसंबंधाभावात् मन्मते तु इंद्रियसंबद्धं धूलिपटलं तद्विशेष्यकं धूम इति ज्ञानं तत्र प्रकारीभूतं धूमत्वं प्र नं
च त्यासत्तिः इंद्रियसंबंधश्चालौकिको ग्राह्यः इदं वह्निरिंद्रियस्थले तु ज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः परंतु समानानां मानसस्थले
भावः सामान्यं तच्च द्विविधं नित्यं धूमत्वादिकमनित्यं घटादि यत्रैको घटः संयोगेन भूतले समवायेन कपाले वा ज्ञातस्तदनं
च तरं सर्वेषामेव तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवतीति तत्रेदं बोध्यं परंतु सामान्यं येन संबंधेन ज्ञायते तेन संबंधेना
धिकरणानां प्रत्यासत्तिः किंतु यत्र तद्घटनाशानंतरं तद्घटवतां स्मरणं जातं तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भा
नं न स्यात् सामान्यस्य तदानीमभावात् किंचेंद्रियसंबद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इंद्रियसंबंधं विना
ज्ञान पि तादृशप्रकारीभूतसामान्यस्य सत्वात्तादृशज्ञानं कुतो न जन्यते तस्मात्सामान्यज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह
आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यत इति प्रत्यासत्तिरित्यर्थः तथा च सामान्यलक्षणा इत्यत्र लक्षणशब्दस्य विषयो त्यासत्तिः १

सकलघटाविषयक ज्ञानं

[redacted] सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह विषयीति विषयीपस्य तस्यैव व्यापारो ज्ञानलक्षणा ४
सा॰ वि॰ ९९ र्थः तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्तते तत्र सकलघटादी
नां चाक्षुषादिः स्यात् स्यादत आह तदिंद्रियजत इमेवाथ सामग्र्यपेक्ष्यत इति अस्यार्थः यत्र बहिरिंद्रियेण सामान्यलक्षणया ज्ञा
यत नं जननीयं तदा किंचिद्धर्मिणि तत्सामान्यस्य तदिंद्रियजन्यज्ञानस्य सामग्र्यपेक्षिता सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकं
19 तेनांधकारादौ चक्षुरादिना तादृशे ज्ञानं न जन्यते ननु ज्ञानलक्षणाप्रत्यासत्तिर्यदि ज्ञानरूपा सामान्यलक्षणाप्रत्यासत्तिरिति दा
अयस्य ज्ञानं जनयति ज्ञानलक्षणाप्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति अत्रायमर्थः प्रत्यक्षे सन्निकर्षं विना भा
नं न संभवति तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत् तदर्थं सामान्यलक्षणा द
स्वीक्रियते तेन च सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यं प्रत्यक्षे धूमे वह्निसंबंधस्य गृहीतत्वात् अन्यधूमस्य चानुपस्थितत्वात् त
धूमो वह्निव्याप्यो न वेति संशयानुपपत्तिः मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालांतरीयदेशांतरीयधूमे वह्निव्याप्य
त्वसंदेहः संभवति न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरिति वाच्यं प्रमेयत्वेन सकलप्रमेयज्ञा
पात्र नेजातेपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात् एवं ज्ञानलक्षणास्वीकारे सुरभि चंदनमिति [redacted] नात्पविशेष्यंस
[redacted] यद्यपि सामान्यलक्षणयापि सौरभभानं संभवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया एवं यत्र धूमत्वेन धूलीपटलं ज्ञा
तं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया योगजो द्विविधः प्रोक्त इति योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणा एन १९

ज्ञाने सौरभस्य भानं कथं स्यात् ३

युक्तस्य तावद्योगजधर्मसहायेन मनसाऽऽकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति द्वितीयस्य तु ताविशेषो पिसहकारि इति २

दिप्रमाणकइत्यर्थः युक्तयुंजानभेदतइति युक्तयुंजानरूपयोगिद्वैविध्याद्धर्मस्यापि द्वैविध्यमिति भावः युक्तस्य सर्वदा भानं चिंतासहकृ
तोपरइति योगाभ्यासवशीकृतमानसः समाधिसमासादित सिद्धिर्युक्तइत्युच्यते अयमेव विशिष्टयोगबलाद्धि युक्तइत्युच्यते
सर्वदेति चिंतासहकारिणं विनाइत्यर्थः भानं सर्वविषयकं प्रत्यक्षं अपरो युंजानः विषयव्यावृत्तमानसः समाधिस्थः अयं च युक्त
इत्युच्यते चिंता ध्यानं मनसस्तदेकाग्रीकरणं तत्सहकारात् स्थूलसूक्ष्मव्यवहितविप्रकृष्टान्प्रत्यक्षीकरोतीत्यर्थः इति श्रीवि
अनुमिति निरूपयति ५ श्वनाथपंचाननविरचितायां सिद्धांतमुक्तावलीप्रत्यक्षपरिच्छेदः १ व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् अनुमायामिति अ
नुमितौ व्याप्तिज्ञानं करणं परामर्शो व्यापारः तथाहि येन पुरुषेण महानसादौ धूमे वह्निव्याप्तिर्गृहीता पश्चात् स एव पुरुषः क्वचित्प णा
र्वतादौ अनवच्छिन्नमूलामभ्रलिहां धूमलेखां पश्यति तदनंतरं धूमो वह्निव्याप्य इत्येवंरूपं व्याप्तिस्मरणं तस्य भवति पश्चाच्च वह्निव्याप्य व
एव धूमवानयमिति ज्ञानं भवति स परामर्श इत्युच्यते तदनंतरं पर्वतो वह्निमानिति ज्ञानं जायते सेयमनुमितिः अत्र प्राचीनाः व्याप्यत्वेन ज्ञा त
यमानं लिंगमनुमिति करणमित्याहुः तद्दूषयति ज्ञायमानं लिंगं तु करणं नहीति लिंगस्यानुमित्यकरणत्वे युक्तिमाह अना
गतादिलिंगे न स्यादनुमितिस्तदेति यद्यनुमितौ लिंगं करणं स्यात्तदाऽनागतेन विनष्टेन वा लिंगेनानुमितिर्न स्यात् अनुमितिक लिंगस्य
रणस्य तदानीमभावात् व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते इति व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहि ज्ञानमनुमिति
ज्ञानजनकं तद्व्याप्यः पक्ष इति ज्ञानं पक्षो व्याप्यवानिति वा ज्ञानं अनुमितिस्तु पक्षे साध्य इति ज्ञानात् पक्षे साध्यमिति साकारिका पक्षो

व्या

मा·सि· व्याप्यवानितिज्ञानात्पक्षः साध्यवानित्याकारिकाद्विविधादपि परामर्शात्पक्षः साध्यवानिति एवानुमितिरिति मते ननु वन्हिव्याप्यधूम
२० वानयं पर्वत इति ज्ञानं विनापि पर्वतो धूमवानिति प्रत्यक्षं ततः धूमो वन्हिव्याप्य इति स्मरणं भवति तत्र ज्ञानद्वयादेवानुमितेर्दर्शनाद्व्याप्ति
शि विशिष्टवैशिष्ट्यावगाहिज्ञानं सर्वत्र न कारणं किंतु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वमावश्यकत्वाद्विशिष्टज्ञानकल्प
चे नेगौरवाच्चेति न्न व्याप्यतावच्छेदकाज्ञानेपि वन्हिव्याप्यवानितिज्ञानादनुमित्युत्पत्तेः साध्यवाद्व्याप्तिप्रकारकपक्ष धर्मताज्ञानत्वे क
20 नहेतुत्वं किंच धूमवान्पर्वत इतिज्ञानादनुमित्यापत्तिः व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकस्य पक्षधर्मताज्ञानस्य सत्वात् न च ग्रह्य
माणाव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वं वाच्यं चैत्रस्य व्याप्तिज्ञाने मैत्रस्य पक्षधर्मताज्ञानादनुमितिः स्यात् यदि तु तत्पु
व रुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं [redacted] तत्पुरुषीयानुमितौ हेतुरुच्यते तदानंतकार्य
कारणभावः मन्मते तु समवायसंबंधेन व्याप्तिप्रकारकं पक्षधर्मताज्ञानं समवायसंबंधेनानुमितिं जनयति इत्यर्थेनानंतकार्यकारणभा
वः यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं च स्वतंत्रं कारणमित्युच्यते तदा कार्यकारणभावद्वयं वन्हिव्याप्यो धूमः आलोकवान्पर्वत इति
ज्ञानादपि अनुमितिः स्यादिति इत्थं च पत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पते फलमुखगौरवस्यादोषत्वादिति व्याप्यो नाम व्याप्त्याश्रयस्त
त्र व्याप्तिः केत्यत आह व्याप्तिः साध्यवदन्यस्मिन्नसंबंध उदाहृत इति वन्हिमान्धूमादित्यादौ साध्यं वन्हिः साध्यवान्महानसादिः तदन्यो ज
लह्रदादिस्तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः धूमवान्वन्हेरित्यादौ साध्यवदन्यस्मिन्नयःपिंडादौ वन्हेः सत्वान्नातिव्याप्तिः तत्त्वयपेन राम
२०

पत्र ३